ज्झो मरुकः ॥ फणिज्झकस्तीक्ष्णगंधो मंजरी कोदलाढके तिकेयदेवः ॥ मरुकस्त्वणकस्तनुरि
ति ॥ ॥

पिंडीतकमिति॰ मरुवकः फलिजूकः॥ पिंडीतकः फलिजुके॥ नगरे मदनद्रौ चेति हैमः॥ पिंडीतको मरुवको
मरुकश्च फाणिजकइति धर्मदासः॥ नगरं वक्रं॥ वक्रं शकावनो॥ उत्तरे चापि दलकं सुगंधिसलिलांति
कं त्वणकं चेति॥ मदनो राठः॥ पुंडरीकमिति॰ सितांभोजं श्वेतपद्मं॥ वालुकाख्यविषं विषभेदाः।
अहिच्छत्रो मेषशृंगः कुष्ठवालुकनंदनाः॥ मुस्ताबो दालवाद्याश्च स्थावराविषजातय इति हैमः॥

॥ पिण्डीतके मरुवके तगरे मदनद्रुमे॥ पुण्डरीकं सिताम्भोजे
वालुकाख्यविषान्तरे सहकारफलेनातु दमने शालिभिद्यपि॥

सहकारफलमतिसुरभ्याम्रफलं॥ वसंतदूतमाकंदसाहारपिकबंधवः॥ सहकारेस्यतु फलं पुंडरी
कमितीरितमिति सिंहः॥ दमनः पुष्पचामरः सर्वांगसुरभिः पुष्पादिवर्जितश्च॥ साहजिकरूपवत्वा
वपुषि भवत्याविभूषणं भारः॥ सर्वांगसौरभिण्या दमनव ॥ न्याः किमालि कुसुमेनेति कश्चित्॥
अत्र शालिभित् पुंडरीक कुसुमाकारशूकः शालिः। पुंड्रः पांडुः पुंडरीकः प्रमोदो गौरशालिकरति

भण्डीरिकेति॰ लोहितामंजिष्ठा॥ तंडुलीयकभिद्मेघनादः॥ चौलाई इति लोके॥ भिरिंटिकेति॰ पय
स्याभित्स्वल्पगुच्छिकाकणं तीगुंजा॥ मरुवक इति॰ पुष्पभेदः मरुवकनाम्नैव विख्यातः॥ करघाटः
फलं॥ करघाटो मरुवकः पिंडी पिंडीतकः फलमिति केपदेवः॥ फणिज्जो मरूकः॥ मदनद्रो मरुवकः पुष्प

भण्डीरिका लोहितायां तण्डुलीयकभिद्यपि॥ भिरिण्टिका पयस्याभित्काकणन्त्योश्च्ययो
षिति॥ मरुवकः पुष्पभेदे करघाट फणिज्जयोः॥ मयूरकः शेखरिके शिखिग्रीवे पि दीप्यके॥

भेदे फणिज्जके इति लोचनः॥ मयूरक इति॰ शेखरिकः किलिही॥ अपामार्गस्तु लाकवत्सिद्धेदु
र्मजरिः स्थिरः॥ दिग्मशदलकश्चेति॥ शिखिग्रीवं तुत्थं॥ तुत्थं वितुन्नकं चापि शिखिग्रीवं मयूरक
मिति धर्म्मदासः॥ नाम्नाकिं दंतु ह्रतकं तुत्थमिति दीप्यकोऽजमोदा॥ ॥ ॥

मधूलकइति० अजातमद्यं अपरिणतंमद्यं ॥ सर्वमद्यमसंजातंमधूलकइतिस्मृतमिति केयदेवः ॥ दी
र्घपत्रोगिरिमधूकः ॥ गिरिजेत्रमधूलकइत्यमरः ॥ गिरिजइत्येवपाठःसाधीयानितिसुभूत्यादयः
॥ गौरशाकोमधूकोन्योगिरिजःसात्म्यपत्रकइतिमाधवः ॥ स्वामीतुजलजइत्याह ॥ मधूकोऽन्योम
धूलस्तुजलजोदीर्घपत्रकइतिनिःशूकदीर्घगोधूमःसूक्ष्मोनंदीमुखीतथा ॥ मधूलिकाचेति
केयदेवः ॥ अंभोजाजलयष्टीमधु ॥ यष्ट्याह्वंमधुकंयष्टीवाम्भोभोजामधूलिकेतिहृदयदीपकः ॥

मधूलकोजातमद्ये दीर्घपत्रेमधूलिका ॥ निःशूकदीर्घगोधूमा
म्भोजामधुरसासुच ॥ मुरङ्गिकाकाकनासादेवश्रेणीमभञ्जने ॥ ॥

मधुरसामुर्वामधुरसादेवीमधुपर्णीमधूलिकेतिधन्वंतरिः ॥ मूर्वासपीलुर्वीरुच्चस्वादुर्हिंस्त्रासु
माधुर्वेति ॥ मुरंगिकेति० ॥ काकनासातुकाकास्याजीवनीयामुरंगिकेतिकेयदेवः ॥ देवश्रेणी २६
मूर्वा ॥ मूर्वामुरंगिकादेवीदेवश्रेणीपृथक्त्वचेतिकेयदेवः ॥ सुभंजनःशोभांजनः ॥ ॥

मृणालकमिति॰ वीरतरं वीरणमूलिका॥ वकुमूलं वीरतरममृणालं मृणालकमिति धर्मदासः॥
उशीरं वीरिणीजटा॥ कशावत्सात्तृणानूपेस्थिरेति॥ पद्मनालं पद्मदंडः॥ वितुन्नकमिति॰ कुस्तुंबरी॰ ध
निका धानिका धानी धान्यं धाना वितुन्नकमिति केयदेवः॥ भद्रमुस्तं नागरमुस्त॥ विषकूपर्णी भूधा
त्री॥ वितुन्नका जटामांसी विषघ्न पर्णी शुभाकिनीति केयदेवः॥ पांडुः सिद्धा विटा धात्री भूपूर्वा दलस
स्थिनीति॥ वितुन्नकं च धान्याके जटामांसा मयूरक इति विश्वः॥ मयूरके तुत्थं तुत्थं वितुन्नकं चा
पि शिखिग्रीवं मयूरकमिति धर्मदासः॥ विषाणिकेति॰ मेषशृंगी चर्मरंगा॥ श्रीहर्षो मेषशृंगी

मृणालकं वीरतरे पद्मनाले वितुन्नकं। कुस्तुम्बरी भद्रमुस्त विषघ्न पर्णी
मयूरके॥ विषाणिका मेषशृंगी काकाली कर्कटाह्वये॥ हर्षेनुना॥ ॥

चशृंगी च शृंगिका॥ वृश्चिकाली मेढ्रशृंगी कूर्चपर्णी विषाणिकेति केयदेवः॥ मेढिआउलिरति गू
र्जराः॥ सन्नाग मलकरई इति पाश्चात्याः॥ आवर्त्तो गुल्मका पीतपुष्पा शंबा त्रिधा च सा॥ पंक्तिपत्राः प्र
सिद्धास्ता मेढवल्यादयोत्र त्विति॥ काकोली॰ मेदुराजीवनीया च सामतेति धन्वंतरिः॥ कर्कटाह्व
यं॥ शृंगी च कुलिंगी कर्कटाह्वायमिति धन्वंतरिः॥ अथ शृंगिका। कर्कटाख्या रिपत्राग्राः पाद
पास मिद्दाश्रयाः॥ ग्रंथयः कर्कटास्तस्य शृंगालीति॥ हर्षो वासा॥ ॥ ॥ ॥ ॥

शीतपाकीति० वत्सावाद्यात्सकः॥ रक्तिकागुंजा॥ सोमवल्क इति० कटुफलं कट्फलं॥ कदरः
सितखदिरः॥ कदरः खदिरेसिते। सोमवल्कोपीत्यमरः॥ घृतपूरकः करंजः॥ सौगंधिकमि
ति० रुचकं सौवर्चलं॥ सौवर्चलंस्याद्रुचकं सुगंधं रुचकं स्मृतं॥ सौगंधिकं चजरणमस्त्रमिति के
यदेवः॥ कह्लारं संध्यादिकासि पद्मिनीपुष्पं। रूप धूपनं हिंगु॥ देवजग्धं रोहिषं। कत्तृणं रोहि
देवजग्धं सौगंधिकं तथेति भावमिश्रः॥ पद्मरागः शोणमणिः॥ लेलीतको गंधपाषाणः॥

शीतपाकीवत्सारक्तिकयोः स्त्रियाम्॥ सोमवल्कः कटुफले कदरे घृतपूरके॥ सौगन्धिकं
तुरुचके॥ कह्लारे रूपधूपने। देवजग्धे पद्मरागे लीबे लेलीतके पुमान्॥ कयम्॥ अथेक्षु
वालिका काशेक्षुरकेच क्षुभिद्यपि॥ ॥

गंधकस्ते लेलीतकेगंधः॥ वैगंधिक सौगंधिक गंधोपलगंधपाषाणा इति हृदयदीपकः॥ कयम्॥
अथेक्षुवालिकेति० काशः॥ इक्षुकांडो वायसेक्षुः सुकांडश्चेक्षुवालिकेति केयदेवः॥ क्षुरकः॥ को
किलाक्षो भिक्षुरिक्षुवालिका तिलकंटक इति केयदेवः॥ इक्षुभित्पौड्रकः कांतारेक्षुवालिकेक्षु
गंधानेपालशतपर्वक कृत्स्नपर्वकवांशिकनीलयष्टिकाद्याइक्षुजातयः शरेक्षु कुशकाशाश्च
शालयश्च प्रसिद्धकाः॥ वंशो दूर्वाचदोलाच विधावर्गस्यपंचकमिति॥ ॥ ॥ २७

स्यात्क्रिमिकंटकमिति० चित्रादंती॥ विडंगः कृमिशत्रुः॥ उदुंबरो जंतुमत्फलः॥ विषयक प्रसिद्धान्ययो
धोदुंबरप्लक्षपिप्पलाः॥ क्षीरितरव इति॥ भवेज्जलकरं क इति० पुरोदकपलंनालिकेरफलं।
स्त्री लांगली लांगलं च त्रिनेत्रो मलकुणो जटी॥ हलीपुरोदकः कूर्चकेसरश्च कलिंगकः॥ फलंजलकर
के स्येति सिंहः॥ अंबुदो मुस्ता॥ कंबुः शंखः॥ शुक्तिः शंखिनिकाशंखो वराटश्चाप्यनेकधा॥ सिंधु
जाश्च सरोजाश्च चक्षुष्यत्वादि हेदितात इति॥ जलजलता जलनीली॥ अथ प्रतिविषुक इति०॥

स्यात्कृमिकण्टकं चित्राविडङ्गोदुम्बरेषु च॥ भवेज्जलकरङ्कस्तु पुरोदकफले
म्बुदे॥ कम्बो जलललतायां च पुंस्यथ प्रतिविष्णुकः॥ क्षीरिल्पामुचकुन्देपि स्यात्॥

क्षीरिणी० क्षीरी राजादनतरुः॥ अन्यः क्षीरी क्षीरिणी॥ राजादः क्षीरभ क्षीरीति केयदेवः॥ स्त्रीव
पुंसोरपि स्त्रीत्वं व्याप्यस्य चत्वविवक्षयेति मेदिनी॥ मुचिलिंदो मदनको राजन्यः क्षत्रपादपः॥ इक्ष्वाकु
: श्रीः क्षीरफलश्चिंवुकः प्रतिविष्णुक इति केयदेवः॥ मुचकुंदः क्षत्रवृक्षश्चिवुकः प्रतिविष्णुक
इति भावमिश्रः। प्रलेपादिना शिरोर्त्तिहारी दीर्घवाटदल पीतसुमः पुष्पमात्रोपयोगी मुचकु
दनाम्नैव प्रसिद्धः॥ ॥

शिवप्र॰
२८

अथ व्रीहिराजक इति॰ कंगुधान्यचीनाकधान्ये तृणधान्यवर्गे प्रसिद्धे॥ शतपर्वक इति॰ वेणुर्वंशः॥
इक्षुभित्-शतपर्वक नाम्नैव ख्यातः॥ शतपर्वक कांतारनेपालाद्यास्ततः क्रमादिति वाचस्पत्याचार्य
॥ षड्ग्रंथा वच॥ अथ वचानूपे मृगाकटुः॥ तन्विक्षुपत्राभूवास्तुमध्यस्थापर्विणी पृथुः।
अपुष्पफलिका चेति॥ नीलदूर्वा शाद्वलं॥ नीलदूर्वा स्मृता शष्पः शाद्वलं हरितस्तथा। शतपर्व्वा

अथ व्रीहिराजकः॥ कङ्गुधान्ये च चीनाकधान्ये स्याच्छतपर्वकः॥ वेणौ विक्षुभिदि
स्त्री तु षड्ग्रन्था नीलदूर्वयोः॥ स्वादुकण्टकइत्येष क्षुरे कोल्यां विकङ्कते॥ ॥

शीतवीर्या शीतवल्लभ सिता चेति धन्वंतरिः॥ स्वादुकंटक इति॰ क्षुरो गोक्षुरः॥ गोक्षुरः स्या
द्गोक्षुरको भक्षरः स्वादुकंटक इति धन्वंतरिः॥ क्षुरः कोकिलाक्षे च गोक्षुरे इति विश्वः॥ को
लीबदरी॥ कोली कंटकिनी सिद्धा बदरं तत्फलं च तत्र। इयं प्रसिद्धं च तयोः स्थूलं घुग्घुर्षं च सज्जुण २८
म्॥ कर्कंधुर्महतीतन्त्रेति॥ विकंकतो यज्ञपादपः। विकङ्कतः स्रुवावृक्षो ग्रन्थिलो व्याघ्रपादपी
त्यमरः॥ हृक्षकंटकारिकेति डल्हणः॥

स्याद्धेमपुष्पिकेति॰ यूथी बालपुष्पा सा चात्र पीता बोध्या स्वर्णवर्णपुष्पत्वात्॥ चंपको गंधफ
ली॥ कषट्ट्:॥ प्राह्नषायणिकेति॰ यूथी बालपुष्पा॥ कंडूराकपिकच्छू:॥ जटिला मांसी॥ मांसीमा
ताभूतकेशी नलदं जटिला जरा। सुलोमशामरवी हि स्त्रोक्त आदीपिनी शिखेति के यदेव:॥
अथ विछिन्न दल: श्वेत: सुलोमश:॥ मृदु: सुगंधिर्लक्षणको दलतो गुच्छकोपि चेति॥ मुखशो
धनकमिति॰ भव्यं कर्मरंगफलं॥ भवं भव्यं भविष्यं च भावनं मुखशोधनमिति के यदेव:॥

स्याद्धेमपुष्पिका यूथ्यां चम्पके हेमपुष्पक:॥ कषट्ट्॥ प्राह्नषायणिका यूथी कण्डू
राजटिलासु च॥ मुखशोधनकं भव्यं नागवल्लीदले लवे। मुखमण्डनको धूम्रवर्णे च तिल
कुसुमे॥ ॥

ग्रंथिलं प्राक्कृपका भद्रलोम्ल मधुरो विट:॥ पलमात्रं सितं पद्मामिति॥ ना
वल्लीदलं तांबूलीदलं॥ लवं लवंगं॥ लवंगं देवकुसुमं भृंगारं शिखरं लवमिति के यदेव:॥ वल्ली
लवंगका नागवल्ली च सित पुष्पिका। गंधिनी चेति। मुखमंडनक इति॰ धूम्रवर्ण तुरुष्क:॥ तु
रुष्क: सिल्हको धूम्रो धूम्रवर्णः श्वलः कपिरिति के यदेव:॥ गांधिकद्रव्यं॥ तिलकद्रुम: श्रीमान्
॥ तिलक: क्षुद्रक: श्रीमान् चित्रको मुखमण्डन इति धन्वंतरि:॥ ॥

हिंगुनिर्यासक इति० पारिभद्रो निंबः॥ अरिष्टः सर्वतोभद्रः सुभद्रः पारिभद्रकः॥ छुछुंदिघ्नो हिं
गुनिर्यासः प्रियशालो रविप्रिय इति धन्वंतरिः॥ हिंगुस्तूपधूपनं॥ कान्ताः॥ खट्टि॥ शाह्वर इति०
नखः शुक्तिः॥ शंखः शफः खुरः शुक्तिः॥ शिल्पी नागहनुर्हनुरिति केयदेवः॥ नखद्वयं समुद्र
स्थाजंतवो निहताः शंकैः। वृहंतो लघवो द्विधा पन्नखा भानखा इति ति॥ कंबुर्वारिचरः॥ शंखो
वारिचरः कंबुर्जलजो दीर्घनिस्वन इति धर्मदासः॥ शिखेति० मांसी माला भूतकेशी क्रव्यादी

हिंगुनिर्यासकः पारिभद्रोऽस्त्रीवंतु हिंगुनि॥ कान्ताः॥ खट्टि॥ शङ्खोऽस्त्रियां नखे
क्रव्यो शिखामांसी विशल्ययोः॥ सुखमेङ्का च हृट्टीचवालकेतु नपुंसकम्॥ ॥

पिशिनी शिखेति धर्मिष्ठः॥ विशल्या कलिकारी वह्निमुखी प्रदीप्ताग्निशिखा शिखेति केयदेवः॥
लांगली त्वरणकाकेंद्रिन्यपरुणे ऽरुसुमासिता॥ आर्द्रकानुदला चेति॥ सुखमिति० रुद्धिर्वृद्धिर्युगं तु
हृष्टिराशीः सर्वजनप्रिया॥ ऋषिसृष्टा सुखं चाथ वृद्धिरप्याढ्या अमी इति केयदेवः॥ रुद्धिर्वृद्धी
प्रतानिन्यौ निंबजीवंति कान्दले॥ स्वादु साधारणे वृद्धिः क्षीरिणपाद्यापि पिच्छिलेति॥ रुद्धिर्द २९
क्षिणावर्त्तवृद्धिर्वमावर्त्ता इति च कश्चित्॥ वालकं वारि। सिद्धोऽचांबुदवालका विति॥ ॥

खच॥ अग्निशिखेति॰ कलिकारी लांगली॥ कुंकुमं वाह्लीकं॥ कुसुंभं वस्त्ररंजनं॥ अथाग्निशिखमुद्दि
ष्टं कुसुंभे कुंकुमेपि चेति मेदिनी॥ अग्निमुखीति जह्वालोरुष्करः॥ गर्भपातिनी कलिकारी॥ इंदुले
खेति सोमलता सोमवल्ली॥ सोमवल्ली धन्वतरुर्यज्ञनेता द्विजप्रिया॥ पक्षपत्रो॰ महार्थी अन्यो
महागुल्मो मखप्रभुः॥ श्येनाहृतस्तस्य भेदा विंशतिश्चतुरुत्तरा इति केपदेवः॥ गुडूचीवत्साद

खच॥ अग्निशिखा कलिकार्य्यामग्निशिखं कुंकुमे कुसुम्भे च॥ अग्निमुखी नल्लीवं भल्ला
तेस्त्री तु गर्भपातिन्याम्॥ इन्दुलेखा सोमलता गुडूची वाकुचीषु च॥ नन्दीमुखी तु कर्पासां
स्वल्पगोधूमभिद्यपि॥ खान्नाः॥ गद्दि॥ तुङ्गी निशा वर्वर्योस्तु तुङ्गः पद्मस्य केसरे॥ तुङ्गाप
वित्रपत्रायां तुङ्गश्चाचे च केसरे॥ ॥

ऽऽनी॥ वाकुची मल्लिना॥ नन्दीमुखीति॰ कर्पासाच्छा
छादनफला॥ स्वल्पगोधूमभित्स्पष्टं॥ खान्नाः॥ गद्दि॥ तुङ्गीति॰ निशा हरिद्रा॥ वर्वराकवरी॥ पद्मके
सरः पद्मकिंजल्कः॥ पद्मशारदिदृश्यतेऽस्ति॥ पवित्रपत्राशमी॥ प्रसिद्धैव शमीतरुरिति॥ चो
चं लांगली॥ केसरः करिकेसरः॥ ॥छ॥

नागइति० तालोध्वजद्रुमः॥ भद्रमुस्तं नागरमुस्ता॥ पुन्नागः कांस्तचंपकः॥ नागकेसरः करिकेसरः॥
पुत्रजननी लक्ष्मणा॥ लक्ष्मणा तु जलाभ्पर्णो वह्नीनाडी दलाद्दले॥ शोणाना कृतिधृक् स्वादुः क्षीरि
णी मृदु शोषिरेति॥ भावमिश्रस्तु पुत्रकाकारस्ता स्यविंदुभिर्लांछितासदा॥ लक्ष्मणा पुत्रजन
नी वस्तगंधाकृतिर्भवेदिति॥ सीसकंद्रुतद्रावंमहाभारं छेदेकृष्णसमुद्भवं॥ पूतिगंधं वहिःकृष्णं
शुद्धं सीसमतोन्यथा॥ अश्रुद्धमिति॥ रंगं वंगं॥ खुरकं मिश्रकं चेति द्विविधं वंगमुच्यते॥ खुरंत

नागस्तालेभद्रमुस्तेपुंन्नागेनागकेसरे॥ नागा पुत्रजनन्यां च नागं सीसकरङ्गयोः॥ पिङ्गं तु वालकेपि
ङ्गी शम्यां पिङ्गा तु रामठे॥ रोचनायां हरिद्रायां पूगः क्रमुकवृंदयोः॥ भृङ्गं नखे त्वचायां भृङ्गो भृङ्गा
रके॥

त्र गुणैः श्रेष्ठं मिश्रकं नहि तं मतमिति॥ पिङ्गमिति० वालकं ह्रीवेरं शमी पवित्रपत्रा॥ रामठं हिंगु॥
रोचनागोरोचना॥ हरिद्रा निशा॥ पूगइति० क्रमुकः घोंटा॥ वृदं व्रस्मनिष्ठं॥ भृंगमिति० नखः व्याघ्र
नखः॥ त्वचा त्वक्॥ भृंगारको भृंगः॥ भृंगारको भृंगराजो भृंगारो भृंगएव चेति धर्मिष्ठः॥ ये ३०
मासमेकंमपिवंति चूर्णं दिने दिने भृंगरजः समुत्थमिति सांनोपि॥ कृष्णस्वरसकः पारद्भु लिप
त्रावद्धु स्तरणः॥ भृंगः प्रसिद्धो गंधोत्पतिक्तः कर्कशकः स्थिरः॥ तन्वं गुलिदल इति॥ ॥ ॥

मार्ग इति॰ आघाटः किणही मार्ग इति केयदेवः ॥ मृगनाभिर्मृगमदो मृगः कस्तूरिकापि चेति माधवः ॥
मृगाः मृगास्तवङ्गो टेनिर्विषाणां कि संधयः ॥ तेषां नाभिस्तु कस्तूरी प्रसिद्धेति ॥ युगमिति॰ ऋद्धि वृद्धी स्त्र
क्षिप्यु प्रे ॥ वङ्गमिति॰ सीसकं भुजङ्गं ॥ रंगं त्रपु ॥ वयनीफलं कर्पासः ॥ वार्त्ताकः वातिंगणः ॥ अथवेगइ
ति॰ महाकालफलं शंयाकः ॥ मेघनादः चौलाई इति लोके ख्यातः ॥ अथशुण्ठीति॰ आम्रातो मन्मथो
द्भवनः ॥ वदरास्त्र फलः ॥ पिप्पलस्थूलदलः ॥ पर्कटीपाकलिः ॥ पर्कटी प्लक्षस्य पाकः ग्योरिति विश्वः ॥

मार्गः ॥ आघाटे मृगनाभौ युगं तु ऋद्धौ च वृद्धौ च ॥ वङ्गं तु सीसके रङ्गे वङ्गस्तु वयनीफले ॥
वार्त्ताकेप्यथ वेगस्तु महाकालफलेपि च ॥ मेघनादेथ शुण्ठी स्यादाम्रातवटपिप्पलेपर्क
ट्यां चाथ शृङ्गो नाम स्तृणे जीवके स्त्रियाम् ॥ विषर्षभश्चावामयः शृङ्गी कर्कटकी शुच ॥ गन्त्रि ॥

चनः ॥ अथ शृंग इति॰ भूस्तृणं मालातृणं ॥ माला तृणं भूस्तृणं द्वे शतपुष्पोग्र गंधिनीति सिंहः ॥
जीवकः ह्रस्वांगः ॥ शृंगा ह्रस्वांग जीवका इत्यमरः ॥ ऋषभो वृषपर्णस्तु काण्डीक्षीरी विटो स्थिर इति ॥
विषा अतिविषा ॥ सिता सितारुणेः वंदे स्त्रि विषं त्वकं गिरा विति ॥ ऋषभो दुर्धरः ॥ ऋषभेति विषायां
च शृंगी मधुर वृषभे सुभयत्र स्तनजये ॥ शिवा हरीतकी ॥ वासादलो दुमो द्विस्तुः फलं तस्य हरीत
की ॥ विषशृंगी वस्तशृंगी ॥ स्तन्यार्द्र इति लोके ॥ कर्कटकी कर्कटशृंगी ॥ गन्त्रि ॥ ॥ ॥ ॥

शिवस॰ कलिंगइति॰लांगलेत्रिनेत्रः॥स्त्रीलांगलीलांगलं चत्रिनेत्रोमत्कुणोजटी॥हलीपुरोदकः कू
३१ चेविसरस्थकलिंगकइतिसिंहः॥गौरः करंजः॥कुटजोवत्सकः॥लघवरंद्रयवः॥कलिंगे
द्रयवः पुमान्इत्यमरमाला॥कालिंगीति॰कर्कारूराजकर्कटीतिकेयदेवः॥खरबूजाइति
31 लोके॥भूमिककारुः कलिंदकं॥कालिंगोभूमिककारौदन्नावलभुजंगयोः॥कालिंगी
राजकर्कट्यामितिमेदिनी॥दीर्घातुकर्कटीगोगीखर्बूजंवर्त्तुलंहियत्र॥रक्तबीजंतत्क

कलिङ्गोलाङ्गलेगौरेकुटजेतद्यवेत्रिषु।कालिङ्गीराजकर्कट्यांभूमिककारुके ऽस्त्रि
याम्॥कुरङ्गीमुद्गपर्ण्यांस्यात्कुरङ्गोमदनद्रुमे।चक्राङ्गीकटुरोहिण्यांमञ्जिष्ठायाया
मपिस्त्रियाम्।त्रिवर्गस्तत्रिजातेस्यात्त्रिफलायांकटुत्रिके।द्विजाङ्गीकटुकात्तुम्ब्योः॥

लिंगंकलिंदं फलवर्त्तुलमितिसिंहः॥कुरङ्गीति॰मुद्गपर्णीमृगगंधिका॥मदनद्रुमोराठः॥
चक्राङ्गीति॰कटुरोहिणीकट्वी॥मंजिष्ठासमंगा॥त्रिवर्गइति॰त्रिजातंत्वक्पत्रैलं॥त्रि
फलाविभीतकामलहरीतक्यः॥त्रिकटुशुंठीमरिचपिप्पल्यः॥द्विजाङ्गीति॰॥कटु ३१
कामतस्यपित्ता॥तुंबीअलाबूः॥ ॥ ॥

नारङ्ग इति॰ पिप्पलीरसः प्रसिद्धः॥ नागरंगस्त्वक्रवासनः॥ नागरंगश्चनारंगो नार्यंगस्त्वक्रवासनः। ऐं रा
वतश्चैवस्यात्तनादेई भूमिजंवुकेति सिंहः॥ पत्राङ्गमिति॰ पद्मकं पद्मकाष्ठं॥ पद्मकं सूक्ष्मविच्छिन्नव
त्रे ज्ञेयं पाटयो फलः॥ कषाय इति॥ रक्तचंदनं पट्टरंजनं॥ रक्तद्रव्ये गंधहीने रक्तचंदनसन्निभे रक्तचंद
नपत्रांगपट्टरंगानि नपुंसक इति सिंहः॥ पत्रांगं न द्वयोर्भूर्जे पद्मके रक्तचंदन इति मेदिनी॥ पतङ्गं रक्त
संज्ञश्च द्वयं रोहीतवाल्छदमिति॥ भूर्जे लिख्यपत्रः॥ तस्य भूर्जो लिख्यपत्रे सु मोल्पकफलस्त्वचः॥ भूर्जोऽन्यः

नारङ्गः पिप्पलीरसे॥ नागरङ्गः पिपत्राङ्गं पद्मके रक्तचन्दने॥ भूर्जे परागः॥
सुमनोरेणुपर्पटचन्दने॥ पतङ्गः॥ शालिभेदे खेचलीवं पतन्नूरस्सूलयोः॥ ॥

स्यात्सारदारुरेकः शालस्तथोः सिन इति॥ पराग इति॰ सुमनोरेणुः कुसुमरजः॥ मञ्जासारो ग्रंथिः परुः॥
परागः कुसुमरेणुरिति पुंस्कांड रत्नकोषः॥ पर्पटोरजः॥ चंदनं श्वेतचंदनं॥ पतङ्ग इति॰ शालिभेदः पतंग
नाम्नैव ख्यातः॥ पतंगाश्चैवस्तपनी। याश्चान्ये चान्ये शालयः शुभा इति वाग्भटः॥ कुंकुमापरपर्याय इति
सिद्धमंत्रप्रकाशः॥ अर्कार्कपर्णः। पतूरं पट्टरंजनं॥ कुचंदनं रक्तकाष्ठं पतंगं पट्टरंजनमिति केयदे

[illegible]

शिवप्र०
३२

प्रियङ्गु पिति० पिप्पली मगधा॥ कंगुस्तु लघ्वन्नं॥ राजिका आसुरी॥ फलिनी महेला॥ पुन्नाग इति० पाट
लापुष्पो देववल्लभः॥ पुन्नागः पाटलापुष्पः केसरो दिवल्लभ इति धर्मिष्ठे केय देवो॥ जाती फलं जाति
सस्यं॥ सितोत्पलं सितपंकजं॥ वराङ्गमिति० त्वक् चोचं॥ कङ्कुष्ठं काककुष्ठा मूषिका भिद्दवंती॥ मुरङ्गी
ति० उपोदका पोतकी० उपोदकोऽर्द्धगा वल्ली पिच्छिलच्छदना स्थिरा॥ वृत्तपत्रा रक्तदंडा रक्तवीजं रसा च
सेति॥ काका चोरस्नायुः॥ मूर्वा मधुरसाः॥ शोभांजनः सुभंजनः॥ तरुणी जनरद्याधिगत्तशोभांजनो च

प्रियंगुः पिप्पली कङ्गु राजिका फलिनीषु च॥ पुन्नागः पाटलापुष्पजाती फल सितोत्पले॥
वराङ्गं त्वचि कङ्कुष्ठ वराङ्गी मूषिका काकामूर्वा शोभाञ्जनेषु च॥ यज्ञाङ्गं ८ं किंशुके द
र्भे तिलोदुम्बर पिप्पले॥ यवे सक्तु फला यां च वालपत्रे पि सर्पिषि॥ रक्ताङ्गो रञ्जने चि
त्रे रक्ताङ्गं विद्रुमे स्त्रजिस्त्राङ्गी जीवनी। जिङ्ग्यो रथाङ्गं नेमियोग्ययोः॥ ॥ ॥ ॥

संतसमयः प्रादुरासीदित्याश्चर्यमंजरी। त्रयोदशास्वराद्यं च शोभांजन उदाहृतमिति द्विरूपकोषः॥ य
ज्ञाङ्ग इति० किंशुकः पलाशः॥ दर्भः कुशः॥ तिलस्तैलफलः॥ उदुंवरो जंतुमत्फलः॥ पिप्पलश्चलद
लः॥ यवः शूकधान्यं॥ सक्तु फला शमी॥ वालपत्रः खदिरः॥ सर्पिर्घृतं॥ रक्ताङ्ग इति० रंजनः कंपिल्लः
॥ चित्रको लोहितांगश्चक्रतभुक्पावकोऽनल इति धर्मिष्ठः॥ विद्रुमो यावव ल्लरी॥ अस्त्रं कुंकुमं॥
जीवनी जीवंती। जिंगी मंजिष्ठा॥ रथाङ्गमिति० नेमिस्तिनिशः पुल्लिंगस्तिनिशो नेमिश्चक्रप्रांते स्त्रिया ३२

मधीति रुद्रः॥ योग्यं स्त्रद्विः॥

समङ्गेति॰ रक्तपादा नमस्कारी ॥ वला वा घाल्लकः ॥ मंजिष्ठा जिंगी ॥ गच ॥ अजशृङ्गीति॰ कर्कटकी
वक्रा ॥ मेषशृंगी चर्मरंगा ॥ गान्ना: ॥ घट्ठि ॥ लघ्विति॰ लोहम गुरु ॥ अगुरु प्रवरं लोहं कृमिजग्धमनार्य्य
कं राजार्हं तच्च मलिनं कालेयं शीर्षकं लघ्विति केपदेव: ॥ अंगुरु द्रुस्तुध्यं गुलिच्छदनः सुमं ॥ अस्यं नच
फलं वा हं जंतु जग्धताव शिष्टकं ॥ सारः सो गुरुरस्मात् शुभागजः क्रमेण विशिष्यत इति ॥ लामज्जमुशीरं ॥ –

समंङ्गा रक्तपादा यां वला मञ्जिष्टयोरपि गच अजशृङ्गी कर्कटकी मेष
शृङ्गी श्वयोषिति गान्नाः घट्ठि लघुलोहे च लामज्जेस्य छाया तु लघुः
स्त्रियाम् घत्रि अमोघा विजया कालवृन्तिका चित्रतण्डुले घान्नाः

वीरणमूलं ॥ लामज्जक मुशीरवल्यी नक्त्विल्लण विशेष इति केचित् ॥ स्पृक्का माल्यवती ॥ घत्रि ॥
अमोघेति॰ विजया पथ्या ॥ अमोघः सफले ऽमोघा व्योना पथ्या विडंगयोरिति विश्वलोच
नाः ॥ कालवृन्तिका पाटलि: ॥ अलिप्रिया विशाला या प्यमोघा पाटलि द्वयो रिति वाचस
ति: ॥ मोघापि॰ मोघा स्त्री पाटला वृक्षे मोघं त्रि पुनिरर्थक इति रुद्रः ॥ पाटला पादपः सारि
सेल्लुपत्रः प्रसिद्धक इति ॥ चित्रतण्डुलं विडंगं ॥ चित्रतंडुले पि मोघा ॥ कृमिघ्नं तण्डुलं मो

शिवम० चह्नि॥कचमिति॰ उदीच्यमंबु॥सिद्धो चांबुदवालकाविति॥कर्पासरक्तफलः॥चञ्चुरिति॰
३२ सितिवारकः सुनिषण्णः॥त्रणकोणगुच्छिरक्तो कसायपत्रो गुवीजकः॥श्वेतमंजरिकः क्षेत्रेभूरुः
स्यात्सितिवारक इति चंचुशाकोनाडीच्यः॥चंचुस्त्रो ग्रंथिस्त्रियां पुंसि गोनाच्येच्यंडबक इसुभय
त्रापि मेदिनी। चोचमिति॥त्वकपत्रकं॥त्वकचोचत्वशब्दास्युर्वल्के चर्म्मणिपत्रके इति धरणिः
33 ॥गुडत्वग्गुत्कटं हृद्यं तनुकं स्वर्णभूमिकमिति धर्म्मिष्ठः॥त्वकस्त्रियां वल्कलेपि स्याच्चर्म्ममात्रेगुड

चह्नि कचं तूदीच्ये कर्पासे चञ्चुर्नासितिवारके चञ्चुशाके वर्द्धमाने चोचं
त्वचि गुडत्वचि दाक्षिण्ये सफले तालफले च नवनीतके चोचो माणवके

त्वचीति विश्वलोचनः। दाक्षिण्यसो नालिकेरः॥तालस्तृणध्वजः॥नवनीतकं॥कदलं॥रीभं
तु कदलं चोचं जालकं नवनीतकं॥लोचकश्चेति सिंहः॥भूछत्रक इति लोके॥माणवकं पा
लेवतं। तद्द्विविधमस्वाद्वम्लं च॥यथा सिद्धमंत्रप्रकाशे वोपदेवः॥पारेवतं मधुरमम्लमि ३२
ति द्विधा स्यात्तिंदुकाकृति फलं लघु पांडुपुष्पं॥नीलछदं हि गदितं तु परेवतारव्यं तसु
ष्करा श्रमसमीपवने प्रसिद्धमिति॥ ॥ ॥

मोचइति॰पिच्छामोचरसः॥ घनच्छदः शिग्रुः॥शल्लकी गजभक्ष्या॥रंभा कदली॥नीलपुष्पी नीला॥चि
रायुः शाल्मली॥वर्षाणि वर्षसहस्त्राणि वनजीवति शाल्मलिरिति॥ चत्रि॥कवचइति॰पर्पटः शीनवल्लभ
॥नंदि पादपः॥प्ररोही स्फूर्जननरुर्नंदी वृक्षो वनस्पतिरिति केयदेवः॥पिप्पलभेदः॥गूढपत्रकरीर
॥क्रकचइति॰गूढपत्रः करीरः॥हलीमकः॥केतकी॰करपत्रवत् दलैः पीतसितैर्दलैर्नैकंटकैरद्भुतं
फलं॥क्वचित्कदाचित्तस्यास्तद्रूणं कल्लशोपममिति॥निकोचइति॰अंकोटः कोलः॥अंकोठस्तु निके

मोचः पिच्छायां चल्लनच्छदे॥मोचालु शल्लकी रम्भा नीलपुष्पी चिरायुषि। चत्रि। कवचः॥
पर्पटे नंदि पादपे गूढपत्रके॥क्रकचो गूढपत्रे स्यात् क्रकचा तु हलीमके॥निकोचोंकोठके
मुस्तेमरिचं कोलीवमूषणे।पुंसि जम्बीर शाके स्यात् मारीचं तीक्ष्णकोलयोः॥ ॥ ॥

चकइत्यमरः॥ढेअंकोठस्य ढेरा इति ख्यातस्येति रामः॥अथाकोठो गुलिपत्रकः॥पादपः कंटकी सा
शमदृढभूमो प्रसिद्ध कइति॥मुस्तमंबुधरः॥मरिचमिति॥ऊषणं तीक्ष्णं॥मरिचं तीक्ष्णमूषणमिति
धर्मदासः॥दीर्घमध्यमपि॰शीतद्वारं हरेत्सद्यो मरीचसुरसारसेरिति विद्वद्वैद्यवल्लभा॥मारीचं कोल
कं कृष्णमूषणं धर्मपत्तनमित्यमरः॥जंबीर शाकं जंभलाख्यं।तद्वन्नक्षणतु॰जंवीरगंधिहरितं परमल्लक
टुकंरसे।शाकं जंवीरमित्युक्तं जंभलं चान्नरापथइति॥मारीचमिति॰तीक्ष्णमूषणं॥कोलकं कोलं॥कंको

लंकटु कंकोलं मारीचं माधवोचितं मिति धर्मिष्ठः॥

शिवप्र०स

३४

34

चच॥ उपकुञ्चीति० राजिका आसुरी॥ क्षुद्रैलाद्राविडी॥ सूक्ष्मा सुपात्रिकोला फलवीजकं। सूक्ष्मं त्रुटिः सुगंधेति॥
कृष्णजीरः कृष्णाजाजी॥ तनुत्वगिति० अरणिर्ह्निलनमंथः। रोध्रो ऽक्षिभैषज्य॥ रलयोरैक्यात्लोध्रोपि॥ वृ
हत्वगिति० भूर्जो लिखपत्रः॥ पत्रपत्वचः कुंजरबिंदुशोणाः॥ पर्णः सप्तपर्णः॥ सप्तपर्णो गुच्छपुष्पो बकुल
कुशाल्मलि विषदइति० गजमदगंधिः॥ नपत्र्युग्मछदगंधिराह्वी तांभ शं नृपो पायनदंति नांमदइति भार
वि:॥ हिलमोचीति० जलब्रह्मी महौषधी॥ अथ महौषधी मघी विषघ्नी चक्रांगी मत्स्याक्षी हिलमोचि
का। जलब्रह्मी चसेति त्रिकांडशेषः॥ हिलमोची शंखधरा जलब्रह्मी च सामतेति केयदेवः॥ मूलकं तुम

चच॥ उपकुञ्ची राजिकायां क्षुद्रैलाकृष्णजीरयोः॥ तनुत्वगरणौ रोध्रे वृहत्वक् भूर्जपर्णयोः॥ हि
लमोची जलब्रह्मी मूलकाशोक वास्तुके। चान्नाः। छछिकच्छा शवरकन्दे च कच्छः कान्ताऽलकद्रुमे॥

हाकंदं हस्तिको हस्तिदंतक इति केयदेवः॥ अशोको वीतशोकः॥ वास्तुको वीरशाकः॥ चान्नाः॥ छछि॥ कच्छेति
० शवरकंदो वाराहीकंदः॥ कच्छा तु चीरिकायां स्याद्वाराह्यामपि दृश्यत इति विश्वलोचनः॥ वाराही सूकरी
कच्छा मागधी गृष्टिका वरा॥ तस्याः कंदस्तु चक्राख्युर्वश्यः शवरकंदक इति केयदेवः॥ क्षीरान्विता मूलकच्छु
ल्पकंदा सन्नाग्रजा सितसर्क कांडा। विभर्ति या पत्रमवमद्दृशा स्वात्साकं चुकी श्वेतवपुर्वरेण्पेत्यरूपांगसंग्र ३४
हः॥ श्यावकर्क शवाराहवृषणाकारकंदका॥ तांबूलवल्लीछदवद्वाराही घृष्टिरुच्यत इत्यन्ये॥ तस्याः कं
दः॥ कांतालकद्रुमस्तु णिः। नंदितुणि नंदिवृक्षः कच्छः कांतालकस्तथेति धर्मदासः॥ ॥ ॥

पिच्छेति॰भक्तमंडः॥ओदननिर्यूहः॥मोचाशाल्मली॥शाल्मलिवेष्टोमोचरसः॥मोचास्रावेमोचरसःशा
ल्मलेवेष्टकस्तथेतिकेयदेवः॥छान्नाः॥जच्छि॥अब्जमिति॰शंखःकंबुः॥निचुलोहिज्जलः॥अथहिज्जलः॥
इज्जलोप्यंबुजोरक्तमंजरोनिचुलोपिचेतिसिंहः॥अंबुजंपंकजं॥सरोजंबुजपंकजं।कैरवंचाब्जमंभोजमि
तिकेयदेवः॥कुब्जइति॰कुब्जोवृहत्पुष्पः॥शतपत्रिकाभेदः॥कुब्जकोभद्रतरणीवृहत्पुष्पोतिकेसररति
धन्वंतरिः॥आघाटोवासकः॥वासाविटपकस्तिक्ताकुटजाभद्रलापकला॥प्रसिद्धेति॥छिजेति॰कोती

पिच्छाभक्तस्यमण्डेचमोचाशाल्मलिवेष्टयोः॥छान्नाः॥जच्छि॥अब्जंशङ्खे॥स्त्रियांनातुनिचुलेहलीवम
म्बुजे॥कुब्जस्तरण्यामाघाटेच्छिजाकोन्मांचबर्वरे॥पिञ्जातूलेहरिद्रायांफञ्जीपद्माविशल्ययोः

रेणुका॥बर्बरःभार्ग्गी॥छिजाभार्ग्गीरेणुकयोरितिहेमचन्द्रः॥भार्ग्गीभ्रगुभवापद्मापंजीब्राह्मणय
ष्टिकेतिधर्मिष्ठः॥अंगारवल्लीफंजीबबचोबर्बरकस्तथेतिधन्वंतरिः॥भार्ग्गीमहीरुहःशैलेगुल्मपरि
च्छदनासिता॥वस्त्रधात्रीसमेति।पिञ्जेति॰तूलःकर्प्पासः॥हरिद्रावरवर्णिनी।पिंजातूलहरिद्र्यो =
रितिलोचनः॥फञ्जीति॰पद्मांगारवल्ली॥फञ्जीपद्मांगारवल्लीमहागर्द्दभगंधिकेतिधर्मदासः॥भा =
ङ्गीतिलोके।विशल्याद्रवंती॥विशल्योदुंबरच्छदा॥द्रवन्तीशाम्बरीफञ्जीन्यग्रोधीमूषिकाह्वयेतिकेय हं

रजइति॰ परागः सुमनोरजः॥ रेणुः पर्व्वटः॥ रजेनापि रजस्समितिषिद्धि रूपकोषः॥ लाजइति॰ आर्द्रतंडुलः अग्नि
पक्वतंडुलः॥ उशीरंवीरणमूलं॥ स्त्रियंपुंसि-वकुलेच अक्षतेषु॥ सर्ज्जइति॰ अश्वकर्णशालः॥ यस्यनिर्या
सःराल॥ कंडूराकपिकच्छूः॥ हस्तिपिप्पलिका गजपिप्पली॥ चविकाचव्विका अस्याऽहरणापिप्पलिकी
समा॥ स्थिरातिकटुका-तस्याः फलंतुगजपिप्पलीति॥ असनोबीजकः॥ जम्त्रि॥ अम्बुजइति॰ निचुलो
हिज्जुलः॥ कमलमम्बुजं॥ अदि जमिति॰ पलितंसिल्हकं॥ तुरुष्कयादयः सेल्हुदलवत्फलबीजकंशे

रजः पुंपरागेरेणौचलाजःस्यादार्द्रतण्डुले॥ नपुंसकमुशीरेथ स्त्रियांम्भूम्निचाक्षते। सर्जोश्वक
र्णकण्डूराहस्तिपिप्पलिकासने॥ जम्त्रि॥ अम्बुजोनिचुलेपुंसिकमलेक्लीवमद्रिजम्। पलिते
शैलनिर्यासेकरजंघृतपूरके॥ नरवेचकारुजोधातौकेसरेतिलभिद्यपि॥ काम्बोजः श्वेतखदि
रेपुंन्नागेसोमवल्कले॥ काम्बोजीपाण्डुराहिङ्गुपत्री चूडामणिस्त्वपि॥ ॥ ॥

लेपस्तद्रसइति॥ शैलनिर्यासः शिलाजतु॥ अद्रिशिलाद्रवः॥ शिलाजत्वऽसितंमत्स्यंशिलाधातुः॥ ग्री
ष्मेतीव्रार्कतप्तेभ्यः पादेभ्योहिमभूभ्रतः स्वर्णरूप्यार्कगर्भेभ्यः शिलाधातुर्विनिःसरेदितिवाग्भटः॥ करज,
मिति॰ घृतपूरकः करंजः॥ नरवाव्याघ्रनखः॥ कारुजइति॰ धातुःस्वर्णादिः॥ केसरः करिकेसरः॥ तिलभिद
त्रवन्यतिलः॥ कांबोजइति॰ श्वेतखदिरः गायत्री॥ पुन्नागस्त्वपक्वभेदइतिदुर्गणः॥ सोमवल्कलः कटु

कटुः॥ पाटलासमपत्रपर्णी॥ हिङ्गुपत्री॥ हिङ्गुपत्रिका॥

गिरिजमिति॰ अमलममलकं ॥ अभ्रकं गिरिजाऽमले इत्यमरः ॥ लोहं मलिनं ॥ शिलाजतु शिलाह्वं ॥ गैरिकं
गिरिमलं ॥ मातुलुंगी बीजपूरकः ॥ कंटकेसरे सुपत्रितः ॥ परिपाके प्ररूढफलः ॥ जलजमिति॰ शंखः कंबुः ॥
पद्मं श्वेतकमलं ॥ नीरजमिति॰ कमलमब्जं ॥ कुष्ठं गदाह्वयं ॥ वनजइति॰ अंधकस्तुंबुरुः ॥ तुंबुरुः सौरसः
सौरो वनजः सानुजोऽधकइति भावमिश्रः ॥ मुस्तोऽबुधरः ॥ गदः पारिभाव्यं ॥ अंबुजमब्जं ॥ मुंजपत्री मृगगं

गिरिजं च मले लोहे शिलाजतुनि गैरिके ॥ गिरिजा मातुलुंग्यां च जलजं शंखपद्मयोः ॥ नीरजं कमले
कुष्ठे वनजोऽन्धकमुस्तयोः ॥ स्त्री वंगसेऽम्बुजे स्त्री तु मुंजपत्र्यां श्वगन्धयोः ॥ शिलाजमिन्द्रजतुनि शैलेय
स्त्री शिलात्वचि । जं च क्षीराब्धिजं स्यात्सामुद्रलवणे मौक्तिकेऽपि च । काश्मीरजा विषयां स्त्री वं कुष्ठे च पौ
ष्करे धीरे ॥ ॥

ध्य ॥ मृगगंधा शिं वियल्ली वनजा शिं विरिंगिणीति केयदेवः ॥ अश्वगंधा तुरगी ॥ शिलाजमिति॰ इंद्रजतु शिला
ह्वं ॥ शिलाजतु इंद्रजत्वपि ॥ जत्वश्मजं शिलाह्वं च गिरिजं गिरिजाह्वयमिति हृदयदीपकः ॥ शैलेयं शिलापुष्पं
शिलात्वक् पाषाणभेदः ॥ जं च ॥ क्षीराब्धिजमिति॰ सामुद्रलवणमक्षिलवणं ॥ मौक्तिकं मुक्ताफलं ॥ काश्मी
रजेति॰ ॥ विषा अतिविषा ॥ कुष्ठमामयः ॥ पौष्करं पुष्करमूलं ॥ धीरं कुंकुमं ॥ ॥ ॥ ॥

तृणराजइति० गुडतृणस्स इक्षुः ॥ मोचा शाल्मली ॥ कत्तृणं रामं कर्पूराख्यं ॥ तालो लेख्यपत्रः ॥ तृणराजो दी
र्घतरुर्लेख्यपत्रो द्रुमेश्वर इति नाममाला ॥ रसराजइति० स्वादुरसो मधुररसः ॥ पारदः सूतः ॥ रसाञ्जनं ता
र्क्ष्यं ॥ जयं ॥ अक्षिभेषजइति० पुष्पकासीसं मलीमसं ॥ कासीसं धातुकासीसं शोधनं रेचनं तथा ॥ छिद्री
यं पुष्पकासीसं लेखनं च मलीमसमिति कैयदेवः ॥ रोध्रः पट्टिकाख्यः ॥ मुनिभेषजमिति० आगस्त्याव

तृणराजो गुडतृणे इक्षौ मोचायां कत्तृणे ताले ॥ रसराजः स्वादुरसे पारदे च रसाञ्जने ॥ जयं ॥ अक्षिभेष
जशब्देन पुष्पकासीसरोध्रयोः ॥ मुनिभेषजमागस्त्ये हरीतक्यां च लङ्घने ॥ जान्नाः ॥ टद्धि कटु
र्द्रेतासुरी कद्वी प्रियङ्गु विजयावहे ॥ ज्योतिष्मत्यां काकमाच्यामथ त्रिकटुके कटु ॥ ॥

गसेनः ॥ हरीतकी पथ्या ॥ लंघनमुपवासः ॥ तस्येहाभिधानं परमौषधत्वात् ॥ जान्नाः ॥ टद्धि ॥ कटुरिति
० लता लताकस्तूरिका ॥ कस्तूरी लतिका चापि तद्गन्धा दक्षिणोद्भवा ॥ अन्या प्रतानिनी काष्ठा वटपत्रा
ऽल्पपुष्पिका ॥ सुगंधिनसुविंवाभाजोस्तनी फलिका स्थिरेति ॥ आसुरी राजिका ॥ कद्वी मत्स्यपित्ता ॥ प्रियं ३६
गुर्वनिताह्वा ॥ विजयावहः सर्षपः ॥ ज्योतिष्मती कंगुणिका ॥ काकमाची काका ॥ त्रिकटु कं शुंठीमरि
चपिप्पल्यः ॥ ॥

कुट इति॰ कृतभुग्वह्निः॥ गंधकुटी॥ मुरागंधकुटी देसाह्लघगंधाकुटी कुटिरिति केयदेवः॥ मुराह्निमाद्दि
देशेषु त्वणं मुस्तोपमं मदु॥ सुगंधिश्चेति॥ घृष्टिरिति॰॥ मूलकमूलाभः किरिः॥ घृष्टिः स्त्री घर्षणे स्पर्द्ध
विष्णुक्रान्तासुनाकिरावितिमेदिनी॥ विषोद्दरः शंखपुष्पीभेदः॥ शंखपुष्प्यांसितारुणावह्निकेत्टणके वि
षकृ लोमशेल्पकपत्रकेइति॥ घोण्टेति॰ मदनं राठः॥ पूगवृक्षेः वेंचुकं॥ वदरीभिदउत्तारण्यवदरी सूक्ष्म

कुटेकृतभुजि स्त्रीतु गन्धकुट्यां कुटी कुटिः॥ घृष्टिर्मूलकमूलाभे पुमान्स्त्रीतु विषोद्दरे॥
घोण्टातु मदने पूगवृक्षे च वदरीभिदि॥ जटी प्लक्षे गर्द्दभाण्डे थो मूलेन नलदे जटा॥ ॥

फला॥ वदरीसदृशाकारो वृक्षः सूक्ष्मफलो भवेत॥ अरण्ये ग्रामे वसा घोंटा गोपघोंटा च सोच्यत इति सु
भूतिः॥ अरण्यवदरी गृध्रनखी घोंटा इति सिंहः॥ जटीति॰ प्लक्षः पर्कटी॥ पाकरिरिति लोके॥ गर्द्दभांडः
पिप्पलभेदः॥ अधोमुखपत्रशाखः॥ जटकृट संघाते॥ सर्वधातुभ्य इतीन्॥ जटिः॥ ङीषि जटी त्रिस
र्वधरः॥ गर्द्दभांडे जटीप्लक्षावितिरूढः॥ जटायोगात्तान्तः पुंल्लिङ्गश्च॥ मूलं वृक्षादीनां॥ नलदं ज
टामांसी॥ मांसी माताभूतकेशी नलदं जटिलं जटेति केयदेवः॥ ॥

शिवप्र० ३७

झिल्टीति० सैरेयकस्तु झिंटी स्यादित्यमरः॥ वाला दासी॥ वाला दासी भुजिष्ययोरिति मेदिनी॥ नीला झिंटी द
पार्वाला दासी चार्त्तगलश्च सेत्यमरः॥ साम हासहा॥ नीला नीलपुष्पा झिं ट्यादिशब्दवाच्यत्यर्थः॥ व
दरी गोपा घोण्टा॥ मोदकी गुडमंजरी॥ झिंगिनी झिंगिली झिंटी मादकी गुडमंजरी। झिंगिनी पादपस्तीक्ष्ण
समिद्दाडिमपत्रकः अपुष्पः कोलफलकश्चेति॥ जीगिनि इति पश्चिमे ख्यातो वृक्षः॥ त्रुटिरिति० एला
सूक्ष्मैला॥ कट्फलः। कटुफलः॥ नट इति० नटमंडनं हरितालं। नटः पोटगलः॥ अशोको वीतशोकः।
वम्यं कुटं नटं प्लवं वन्यं वितुन्नं परिपेलवमिति निघंटुः॥ मुस्ताभेदः॥ नलीकपोतांघ्रिर्नटी नलीत्यमरः॥

॥ झिल्टी सैरेयके वाला वदरी मोदकीषु च॥ त्रुटिरेला कट्फलयोर्नटस्तु नटमल्लमे॥ नटे
शोकनटं वन्येनली नीलिकयोर्नटी। पटुः पुंसि पटोले स्त्री छत्रायां लवणे पटु॥ पट्टिः स्त्री
कृष्णवृन्तायां पट्टी लाक्षाप्रसादने॥ वटो वराटे न्यग्रोधे यष्टी क्लीतकयष्टयोः॥

नीलिका नीली॥ पटुरिति० पटोलस्तिक्तकः पटुरित्यमरः॥ छत्रा मिसिः॥ लवणं सैंधवादि॥ पट्टि ॥ ३७
रिति० कृष्णवृन्ता पाटला। पाटला पादपः सारिसलुपत्रः प्रसिद्धकः॥ काष्टपाटलिका तद्वल्कादेवद ॥
लिनी सितेति॥ लाक्षाप्रसादनो रोध्रः॥ वट इति० वराटः कपर्दकः॥ न्यग्रोधो वकृयाद्वटस्त्यमरः॥ [illegible]
यष्टीति० क्लीतकं यष्टीमधु॥ यष्टी च मधुयष्टी च यष्टीमधुकमेव चेति वाचस्पतिः॥ मधुकं क्लीतकं
यष्टीमधुकं मधुयष्टिकेत्यमरः॥ पद्माभागी। भागी महीरुहः शैलेयं गुल्मः रिच्छदनासिता॥ अस्त्रधा

रिष्टइति॰कुष्ठंवाप्यं॥कुष्ठंगदाह्वयंमूलंतस्यपुष्करमूलकमितित्रिकांडशेषः॥तुकूपुष्करावभि
न्नौतुविटपौतुरगीदलौ॥सिताऽसितसमिल्लौचगिरौमूलककंदिनाविति॥तुरगीअश्वगंधाःफेनिलोरि
ष्टः॥विटइति॰अम्लकमलं॥लवणंपटु॥रिमोऽरिमः॥शटीति॰शटीशटितंशल्लाटुरित्यूष्मविवेकात्त
ालव्यादिः॥अत्रपुनर्नवाभेदः॥शटीविस्तीर्णवल्लीस्यादिति॥गंधमूलासुव्रता॥शटीपलाशीष्ट्यं

रिष्टःकुष्ठेफेनिलेचविटोक्लोल्लवलोरिमे।शटीपुनर्नवाभेदगन्धमूलामयूरके॥त्रि॥अरिष्टोलसु
नेनिम्बेरिष्टेऽरिष्टंतुगोरसे।स्त्रियांनागबलाकट्वोर्मघभेदेतुनस्त्रियाम्॥उच्चटाश्वेतगुञ्जायांभूधा
त्रीछत्रमुस्तयोः॥

यासुव्रतागंधमूलिका॰गंधमूलिकागंधद्रव्यंकाश्मीरेप्रसिद्धं।शटीसटीचकर्चूरइतिहृदयदीप
कः॥मयूरकोऽपामार्गः॥त्रि॥अरिष्टइति॰लसुनंम्लेच्छकंदः॥निंबःपिचुमंदः॥रिष्टोरक्षावी
जः॥गोरसः॥कालसेयं॥दंडाहतंकालसेयंगोरसइतिहृदयदीपकः॥नागबलागांगेरुकी॥कट्वीक
टुरोहिणी॥क्वथितौषधयुक्तैर्मघकैरेःकृतंमघमरिष्टः॥उच्चटेति॰श्वेतगुंजाकाकमंडिकाभूधा
त्रीभूम्यामलकी॰छत्रमुस्तंचूडाला॰यच्छत्रमुस्तकंतत्रचूडालाचक्रलोऽच्चटेतिसिंहः॥ ॥

शिवप्र°
३८

करटीति॰ अल्मक्तकोलट्टा॥ विल्वः श्रीफलः॥ करीरो गूढपत्रः॥ कच्चूरमिति॰ तोयपिप्पली जलपिप्पली गं
द्रूपरी नोयवल्ली सांगली कं चरं चेतदिति केयदेवः॥ घुकुंनयानि समावेति लोके॥ तंडुलीयो मार्षः॥ तन्नेदो ज
लतंडुलीयः। पानीयतंडुली यो यस्तत्कंचरमुदाहृतमिति भावमिश्रः॥ कर्कोटीति॰ देवताडो देवदाली॥ क
र्कशाछदा कटुकोशातकी॥ कोशातकी तु कर्कोटी जालिनी कर्कशाछदेति केयदेवः॥ कर्कटीति॰ वीजयेशी
कमलादिकर्णिकावीजाधारभूता॥ एर्वारुः कर्कटिः। उन्मत्तो धुस्तुरिर्वारुः कर्कटिः स्यादिति पुंस्कांडे रत्न
कोषः॥ दीर्घादिरपि तुर्यस्वरादिरीर्वारुः कर्कट्यां कथ्यते बुधैरिति। प्रस्तावात्तु चिरीर्वारुरिति हारावली॥

करघ्नलक्तके स्त्रीवं पुंसि विल्वकरीरयोः। कच्चूरं तोयपिप्पल्यां तण्डुलीयकभिद्यपि। कर्कोटी
स्याद्देवताडकर्कशाछदयोरपि। कर्कटी वीजपेश्यां स्यादिर्वारौ शाल्मलीफले। कर्कटा कुलिरायां
च कर्कटं मगलिण्डुके। करहाटे कर्कटः स्यात्कुक्कुटः शिखिवारके। गूढपत्रे कुक्कुटी तु काकणन्तीरसो

आडिः एर्वारुरपि॥ शाल्मलीफलं तूलिनीफलं। कुलिरा कुलीरशृंगी॥ कर्कटाख्या कर्कटकी शृंगी कर्क
टशृंग्यपि। कुलीरशृंगी कुलिरेति हृदयदीपकः॥ मगलिण्डुकं गांगेरुकीफलं॥ करहाटः शिफाकंदः॥
कुक्कुट इति॰ शिखिवारः शितिवरः स्वस्तिकः सुनिषण्णकः॥ श्रीवारकः सूचिपत्रः पर्णासः कुक्कुटः शि
खीति निघंटुः॥ गूढपत्रः करीरः। काकणन्ती गुंजा। रसो नोरिष्टः॥ कंदभेदो ऽत्र कुक्कुटी स्फुटिकरचितकु
क्कुटांडसदृशकंदा कुक्कुटी शरीरवत्कुसुमविचित्रा वल्लीति उत्तरे पूतनाप्रतिषेधे डल्लणः॥ कुक्कुटी
लट्टा कुसुंभः। मोचा शाल्मली॥ अश्मभित्पाषाणभेदः॥ ॥

३८

कुरलीति॰ शीर्षमंजरी सितिवारकः॥ किंकिरातः पीतवासकः॥ कुनटीति॰ मनःशिलादिरोषधिः। ने
पाली कुनटी गोला शिलादिरोषधिः स्मृतेति धर्मिष्ठः॥ तालकस्य च भेदास्तिमनोगुप्तातदंतरं॥ ताल
कं त्वतिपीतं स्यात् वङ्गकामनःशिलेति भावमिश्रः॥ धातुर्नेपालीरक्ता॥ लं पीतं वर्णकमिस्यन्यत्राणि॥
मनःशिला त्रिधा प्रोक्ता श्यामांगी कणवीरका। खंडाख्या चेति तद्रूपं विविच्य परिकथ्यते॥ श्यामारक्ता
सगौरा च भाराढ्या श्यामिका मता॥ तेजस्विनी च निर्गौरा ताम्राभा कणवीरका॥ चूर्णीभूताऽतिरक्तांगी
सभारा खंडपूर्विकेति वाग्भटः॥ नेपाली मनोज्ञा॥ मनोज्ञा शिशुगंधिका। नेपाली चेति कैयदेवः॥ निवारी

कुरली शीर्षमञ्जर्यां कुरण्टः किङ्किरातके॥ कुनटी मनःशिलायां नेपाल्यां च वितुन्नके॥ च
र्पटः पर्पटेऽपि स्यात् पिष्टभेदेऽपि चर्पटी॥ त्रिकण्टस्त्रिकण्टश्च पिष्ठृङ्गाटगोक्षुरेऽपि च॥ त्रिपुटे
नामल्लिकयोस्त्रिवृताबृहदेलयोः॥ सतीनके तु चणके त्रिपुटश्च॥ ॥ ॥

त्या रक्तया रक्ता तोमल्लिकाभेदः॥ वितुन्नकं धनिका॥ कुनटी धनिका छत्राकुस्तुंबुरु वितुन्नकमिति भा
वमिश्रः॥ चर्पट इति॰ पर्पटः॥ निस्तुषमाषादिचूर्णस्य हिंगुसैंधवस्वर्जिकापरिचजीरकदधिपकुते
लादियुक्तस्य कुंडितमर्दितस्य कृतो मंडकः॥ पिष्टभेदे त्रपोली॥ अथ पोली पूपली चर्पटी च सेति त्रिकांड
शेषः॥ त्रिकण्ट इति॰ शृङ्गाट्यां॥ शृंगाटः जलवल्लीफलं॥ गोक्षुरः। त्रिकंटस्त्रिकटस्त्रिकट इति कैयदेवः
॥ त्रिपुटेति॰ एला सूक्ष्मैला॥ वाचस्पतिस्तु त्रिपुटी त्यपि पठति। मल्लिका तत्र लम्भूतम्॥ त्रिवृता सरणा। सर्वा

नुभूतिः सरणा त्रिपुटा रेचनी सरेति कैयदेवः॥ वृहद्देला
भेदेला॥ सतीनक स्त्रिविधः। सतीनको वर्त्तुलको हरेणुः ८

स्वल्पवर्त्तुलः कलायस्त्रिपुट इति धर्मिष्ठः॥ वलाको
हरिजीवनः॥ ॥

अथपर्कटी० पूगादिनूतनफले॥जटामोक्षेगादि॥प्लक्षः॥पर्कटीप्लक्षेपिप्पलपार्श्वयइतिशाश्वतः॥पिप्प
लभेदः॥फल्गीशः क्षीरपादपइत्यपरपर्याय॥पर्पटीति० जतुकृष्णा०पर्पटीरंजनीकृष्णाजतुकाजननी
जनी॥जतुकृष्णाचसंस्पर्शाजतुकृच्चवर्द्धिनी॥पापरीतिप्रसिद्धा०पद्मावती०इतिप्रसिद्धंसुगंधिद्रव्य
मितिभावमिश्रः॥रजःकवचः॥पर्पटीमंजरीदृढः॥विटपइति०पिष्टभिस्त्रपर्पटः॥मर्कटीति० शु
कशिंवा॥इयाजांगलिकासेवसाऽजहाप्राचृषायणीतोदुः॥शूकशिंविरक्तमर्कटी॥शूकशिंवाचे

अथपर्कटी॥पूगादिनूतनफलेप्लक्षपिप्पलभेदयोः॥पर्पटीजतुकृष्णायांरजःपिष्टभिदोई
योः॥मर्कटीशूकशिम्बायांचक्राङ्गांकरजान्तरे॥अपामार्गस्यभेदेचधान्यभेदेतुमर्कटः॥
मार्कटोराजकर्कट्याःप्राचीनामलकस्यच॥वीजगवेधुकायांश्वफलेपुंसि॥

तिवाचस्पतिः॥कृस्यादिश्च॥माषवल्लाशुकशिंवाकर्कटीराक्षसीफलवूकाश्वगंधानामितिचक्रः॥शा
शम्बलुधांकशिशिरांसिचशूकशिंविविस्रूक्ष्मविवेकाद्दितालक्ष्यः॥चक्रांगीकटुका॥करजःकरंज
॥अपामार्गःशिखरी॥मर्कटस्तृणधान्यं॥मार्कटइति०राजकर्कटीरवर्वारुः॥प्राचीनामलकं
वारिवदरं॥प्राचीनामलकवारिवदरेद्वइतित्रिकांडशेषः॥प्राचीनामलकंरक्तंवदरामम्लकंच
तत्॥प्राचीनागरमप्येतदितिसिंहः॥तयोर्वीजे॥अग्नियोम्यावयवः॥गवेधुकातृणधान्यम्॥ ३९

अथमोरटमिति॰ सप्तरात्रात्परस्क्षीरम्॥ सप्ताहान्मोहरणंमलिनमिति टवर्गपंचमं पठति ह्रस्वपदीपकः॥ अंकोठांकोल्लः॥ इक्षुमूलंदीर्घपत्रजटा॥ पीलुपर्णीमूर्वा॥ म्रोवाटइति॰ कृष्णजीरकं कालजीरकं॥ चंदनंगंधसारं॥ स्वादनेकटुकंशीतमीषत्पीतंचघर्षणे॥ छेदनेरक्तवर्णंपत्रचंदनंतद्वरंपरमितिधर्मिष्ठः॥ कदलीगर्भःरम्भामध्यावयवः॥ शलाटुरिति॰ शिवंधात्रीफलं॥ भिन्नत्वङ्मंडलोवाढाम्रुलकाष्ठोऽणुपंक्तिवैः॥ हलेन्दुमः फलंधात्रीफलमस्येति॥ विल्वंश्रीफलं॥ शार्ङ्गेष्टेति॰ काकणंती

अथमोरटम्॥ सप्तरात्रात्परक्षीरेऽङ्कोठपुष्पेक्षुमूलयोः॥ मोरटापीलुपर्ण्यांचम्रोवाटःकृ
ष्णजीरके॥ चन्दनेकदलीगर्भेशलाटुःशिवविल्वयोः॥ शार्ङ्गेष्टाकाकणन्त्यांचकाकमाचीकर
ञ्जयोः॥ टच॥ करहाटःपद्मकन्देपिण्डीतेपकुरंनटम्॥ कैवर्त्तीमुस्तकेजिह्मेशालूकेचाकुटंनटः॥

रक्तगुंजा॥ काकमाचीकाका॥ करंजःकरजः॥ टच॥ करहाटइति॰ पद्मकंदः शालूकं॥ पिण्डीतो
मदनफलं॥ करहाटोमरुवकः शल्यकोविषपुष्पकइतिधर्मिष्ठः॥ अथकुटंनटमिति॰ कैवर्त्तीमु
स्तकंपरिपेलवं॥ परिपेलवंप्लववंवन्यंतत्कुटंनटसंज्ञकं॥ जायतेमंडुकाकारंशैवालदलसंचय
इत्यजयः॥ जिह्मंतगरं॥ शालूकोऽरलुः॥ शालूकोविजनोभक्षःपृथुश्शिवंकुटंनटइतिकेयदेवः॥

गोपघोण्टइति० पूगफलमुद्वेगः॥विकंकतमहीरुहः॥स्रुवतरुः॥वृक्षकंटकाविकंति प्रसिद्ध इति
स्वनामख्यातवर्गी।यवनेष्टइति०॥पारिभद्रो निंबः॥लसुनमरिष्टं॥कोशात्केशविनाशलेशत्लसुनसमा
सुषीतांत्रावइति विवेकात्तताल्लयमध्यः॥वृन्तमूलकं स्कन्दमूलकं॥खर्जूरी दुरारोहा॥मरिच मूषणं॥
सीसकं त्रपु॥विषमुष्टिरिति० महानिंबोद्देश्का॥क्षुद्रमुष्टिः केशमुष्टिः॥विषमुष्टिः केशमुष्टिः क्षुद्रमुष्टिः
सुमुष्टिकेति केयदेवः॥टोडीति ख्यातः फलशाकः॥कुपीलुः काकपीलुकः॥सिंहकण्टेति० पुन्नागकेसरोदे

गोपघोण्टः पूगफले विकङ्कतमहीरुहे।यवनेष्टः पारिभद्रे लसुने वृन्तमूलके।खर्जूर्यां मरिचे चाथो य
वनेष्टं च सीसके।विषमुष्टिर्महानिम्बे क्षुद्रमुष्टौ कुपीलुनि।सिंहकण्टा तु पुन्नागकेसरे नागकेसरे।टान्ता॥
उद्धिका ग्वारुहारिद्रा यां काष्ठं सामान्यदारुणि।कुष्ठं तु नद्याः पारिभाव्ये रामत्वरणेणुमान्।शठस्तु मन्त्र तगर
शस्त्रा(?) कुङ्कुमे पुच।ठान्तं।अम्बष्ठा माचिकापाठा चांगेरी यूथिके
देववल्लभः॥नागकेसरः कारिकेसरः॥
अथसुवर्णभनागास्थो नागकेसरः॥स्यात्पुष्परोचनश्चापीति पुरुषोत्तमः॥टान्ताः॥उद्धि॥काष्ठेति० दा
रुहरिद्रापचंपचा॥सामान्यदारु इंधनं॥काष्ठं दार्विन्धनं त्वेध इत्यमरः॥कुष्ठमिति० पारिभाव्यं कौवेरंभा
स्वरं कुष्ठं पारिभाव्यं गदाह्वयमितिरभसः॥रामत्वरणं कत्र्णलं॥शठ इति० उन्मत्तो धुस्तूरः॥तगरं वक्रं॥शस्त्रा
द्र शं खपुष्पी॥कुंकुमं वाल्हीकं॥ठान्तं॥अंबष्ठेति०।माचिकाअंबालिका॥अंबष्ठांबष्ठकीदंतशठा चां
इति ख्यातो वृक्षविशेषः॥पाठा पापचेली॥चांगेरी अम्लवाटिका॥अम्लपत्रिकेति समानार्थाः॥यूं

रामठं पिति॰ हिंगुवाह्लीकं॥ वाह्लीकं हिंगु रामठमित्यमरः॥ सिद्धमंत्रास्तुरत्नं च॥ मरिचैलादीप्यगंधासुरीसर्व
परामठाद्दति॥ पिंडा हिंगुपत्री॥ पृथ्वीकापृथुलापिंडा रामठी चाल्पपत्रिकेतिकेयदेवः॥ समष्ठिलत्सो ध्या
पामार्गः॥ ठच॥ दन्तशठइति॰ करमर्द्दः सुषेणः॥ गुच्छः क्षीरीवक्रदलः कंटकी करमर्द्दकः॥ फलं साम्लं को
लमात्रं हस्वं पक्वमिति॥ जंभीलो जंभलः॥ नागरंगः नारंगः॥ भव्यं कर्मरंग फलं॥ ग्राही कपित्थः॥ तरुः कपि
त्थोऽस्य सरसः कषायाम्लितकः फलं॥ सितमामं कषायाम्लं पक्वं स्वादु सुगंधि च॥ सकषायं लंद्ध्यंतन्न महद्दन्मे
फलेमिरेदिति॥ चिंचा वक्रफला॥ अम्लवाटिका चांगेरी॥ पूतिका श्वमिति॰ सरलश्चीढा॥ देवदारु देवकाष्ठं॥

रामठं हिंगु निस्त्री तु पिण्डयां नासमष्ठिले। ठच॥ दन्तशठः करमर्द्दजम्भी लेनागारङ्कपि भव्ये ग्राहि
णियो चिंतिचि च्चा पाम्लवाटिकायां च॥ पूतिकाष्ठं तु सरले देवदारुणि चाष्ठयाः शाकश्रेष्ठा तु जीवन्त्यां शा
कश्रेष्ठं च वास्तुके॥ ग्रान्ताः॥ डाढ्ढु॥ क्ष्वेडा वंशशलाकायामथ पुंसि हलाहले॥ लोहितार्कपर्णफले ऽक्षी॥

शाकश्रेष्ठेति॰ जीवंती जीवनी॥ वास्तुकं वास्तूकं॥ ग्रान्ताः॥ उढ्ढुः क्ष्वेडेति॰ वंशशलाका वंशघटिता श
लाका॥ हलाहलः विषं॥ हालाहलं हालाहलं वदंत्यपि हलाहलमिति द्विरूपकोषः॥ लोहितार्कप
र्णफलं रक्तरविफलं॥ कर्णवेधनं कोषवती॥ क्ष्वेडः कर्णवेधनं च कोषवतीति हृदयदीपकः॥ कटुतोर
इति लोके॥ क्ष्वेडरक्तरक्तार्कफले घोषपुष्पे दुरासदे इति लोचनः॥ ॥ ॥ ॥

खण्ड इति इक्षुविकृतिः ॥ अंग्निमले ॥ इक्षुरसपाकविकारः ॥ इक्षोरसस्य समलेत्रांशा — क्रिमत्स्यण्डिकाः ॥ विका
राः फाणितगुडमत्स्यंडी खंडशार्कराइति वोपदेवः ॥ विश्वदेवी गंगेरुकी ॥ गुलशार्करीति लोके ख्याता ॥ अ
स्य सितकुसुमां वरनामाङ्कुरितिर्डल्हणः ॥ गुड इति॰ फाणितः क्षारः ॥ फाणितः त्रियांगुडक्षारो स्तत्र्यंशमलेक्ष
वेइति धर्मिष्ठः ॥ गंडोलस्याङ्गुडः स्वाडुरिति त्रिकांडशेषः ॥ हारहूराद्राक्षा ॥ द्राक्षा तु गोस्तनी ॥ मृद्वीका
हारहूरा चेति हैमः ॥ वज्रकंटकः स्नुही ॥ गंडीरस्थासिपत्रश्च गुडागुडापि च स्नुहीति सिंहः ॥ गुडो गोलेक्षु
विकृती स्नुहीगुडकयोर्गुडइति रुद्रः ॥ चण्डेति॰ ॥ घोषा ॥ शताह्वाकारवी घोषा सितछत्रा ऽतिछत्रिके

॥ खण्डः स्यादिक्षुविकृतौ विश्वदेवां तु योषिति ॥ गुडः फाणो गुडा हारहूरायां च प्रकाण्डके ॥ चण्डा
घोषा चारेपु थ्यार्दं वस्यां क्रोधमूर्छिते ॥ यवान्यां गंधमांस्यां च तिन्त्रिण्यां तु छिलिरुंभाक् ॥ ॥

ति के पदेवः ॥ शताह्वच्छिन्नसूक्ष्मा पुच्छहानी लोरुगंधका ॥ त्वग्वकौ ग्रमजीरागसस्या॰ कृष्णापिताह
शी ॥ वीजकोषविशेषो ऽत्रेति ॥ चोरपुष्पी शंखाह्वा ॥ रात्रिविकासित्वात् ॥ द्रवन्ती शंबरी ॥ माता भूमि
चरी चंडा शंबरी वकुयादिका ॥ द्रवंती चेत्यभिधानचूडामणिः ॥ क्रोधमूर्छितः ॥ दुःकुलीनाधनहरीवि
रोकः क्रोधमूर्छितइति वाचस्पतिः चंडाधनहरी क्षेमदुःपुत्रगणहासकाऽत्यमरः ॥ चंडाख्यनामख्या
ताश्चत्र कामश्चोरकभेदोजमोदाकारइत्येकाद्विगणेऽह्लणः ॥ यवानीयवसाह्वा ॥ यवानी स्यादुग्र
धैवेति द्विरूपकोषः ॥ गंधमांसी पूतना ॥ तिन्त्रिणी वक्रफला ॥ चंडेना ऽतितिलीप्रक्षेयम किंकर इत्य

५०

पिएडुमिति॰ लोहमयः ॥ वलं वोल्वम् ॥ जयापुष्पं जवाकुसुमं ॥ सिल्हकः कपिः ॥ अलाबूरलंबी ॥ नगरं नसं ॥ खर्जूः खर्जूरी ॥ वरावत्सादनी ॥ वरावत्सादनी पिंडेति को पाल्हरं ॥ निहूहरिद्रा ॥ पृथ्वी हिंगुपत्री ॥ भल्लुटीति॰ जिङ्गी मंजिष्ठा ॥ कूष्मांडः कुसुमफलं ॥ कर्कटी भित्तगांगी ॥ मएडुति॰ रुवुरंडः ॥ असिक्थान्नरसः ॥ मंडो सिक्थः ॥ ससिक्था पेया ॥ परिसिक्था यवागूः स्यात् ॥ घनसिक्था तु विलेपी ॥ परिस्रुतस्त्वोदनोभक्तरसति प्रस्रयदीयकः ॥ मस्तु दधिजलं ॥ आमलकी धात्री ॥ शोडीति॰ पिप्पलीमाध ॥

॥ पिएडुलोहे वले पिएडो जपापुष्पे च सिल्हके ॥ पिंएडुरलावू नगरयोः पिएडा खर्जू वरानिशि ॥ पृथ्व्यां च भल्लुटी जिङ्ग्यां ना कूष्माएडे कर्कटी भिदि ॥ मएडो रुवाव सिक्थान्नरसे क्लीव तु मस्तुनि ॥ आमलक्यां द्रु स्त्रियां शोएडी पिप्पल्यां च विवेके पि चाडत्रिः ॥ एरएड मूषिका क्वायां पुंसि तन्नानपत्रके ॥ द्राविडमिति विडलवणे स्त्रियां त्रुटो नातुक चूरे ॥ ॥

च विवेकं चव्यं ॥ डत्रिः ॥ एरएडुति ॥ मूषिका क्वाद्वन्त्री ॥ उन्नानपत्रक एरएडः ॥ द्राविडमिति विडलवणमासुरं ॥ द्राविडं विडमासुरमिति धर्मिष्ठः ॥ त्रुटिः सूक्ष्मैला ॥ सूक्ष्मैला द्राविडी बालाप्युक्तैलाऽनिष्कुटिः त्रुटिरिति धर्मदासः ॥ कच्चूरो गंधमूलस्तत्र द्राविडो वेधमुख्यक इति माधवः ॥ कच्चूरकं दोरं भावत्र छ इनस्त्व एक रत्ननु दिति ॥ ॥ ॥

निर्गुण्डीति० इंद्र सुरा सुरवारुणी॥ ऐंद्री त्विंद्रसुरा चित्रा गवाक्षी सुरवारुणीति रूदयदीपकः॥ निर्गुंडी शालिका
नाम्न शेफाऽऽरयोः करहाट वडूति लोचनः॥ करहाटः शिफाकंदः॥ सिंदुवा॥ सिंदुवारः श्वेतपुष्पः सिंदुकः सिंदुवा
रकः॥ शीतपुष्पः शीतसहस्रति॥ निर्गुंडीक द्वयात् विसंदला॥ गुल्मगुच्छाव्यसन्नास्यासितेति॥ मेउडी तिलोके ख्याता॥
शेफाली पुष्पवर्षिणी॥ शेफालिका न्या निर्गुंडी वनको नीलमंजरीति माला॥ अन्याताहृ शीतनुः॥ शेफालिकेति॥ श्रृंगार
हारइति वृन्दावनावनेप्रसिद्धा कथमितिरथा शेफाली पुरुस वल्लतु सुमासु चेति॥ मत्स्यण्डीति० गंडदूर्वा गंडिनी॥ गंडी

निर्गुण्डीन्द्रसुरायां करहाटे सिन्दुके च शेफाल्यां मत्स्यण्डीगण्डदूर्वायां संभृता इक्ष्वे इक्षुवेडच दीर्घदण्ड
गन्धर्वहस्तके च द्रुमोत्पले उन्ना: एन्द्रि कणो नासूक्ष्मधान्यांशे पिप्पली जीरयोर्द्वयोः कृष्णं मरीचे लो
हे स्त्री नीली द्राक्षा कणासु च तीक्ष्णं मरिचका कोलमूलक सारमुष्ककेसमुद्रलवणेल्ली वंयुं सितुक्ष्वक भिधे

॥
रिकारजवंडावेतसाः कारपत्रा संतती श्णाकुस्मादि समीपि जायत इति रूपनारायणः॥ संभृता इक्ष्मले क्षव: मत्स्या
लादौ सम्यक् पक्वा इक्ष्मले क्षुरसः॥ डच॥ दीर्घदण्ड इति० गंधर्वहस्तक एरंडः॥ द्रुमोत्पलो दीर्घफलः॥ आरग्वधो दी
र्घफलो रंडयालो द्रुमोत्पल इति धर्मिष्ठ॥ उन्नाः॥ एन्द्रि॥ कणइति० सूक्ष्मधान्यांश:॥ क्षुद्र तंदुलादिः॥ कणः स्या
त्क्षुद्र तंदुल इति हलायुधः॥ पिप्पली मगधा शौंडी वैदेही चपला कणेति धर्मिष्ठः॥ कणलवणक्ष्वेलासर्षपाल्पदृ
नानीति वर्णेटः॥ जीरो जाजी॥ जीरको जरणो जाजी कणः स्याद्दीर्घजीरक इति भावमिश्रः॥ पिप्पलीजीरकुंभीर मक्षि
कासु कणास्मृतेति विश्वलोचनः॥ कृष्णमिति० मरीचमूषणं॥ लोहमयः॥ नीली नीलिनी॥ द्राक्षा गोस्तनी॥ कणा पिप्प

४२

पर्णमिति॰ पलाशं छदनं ॥ पत्रं पलाशं छदनं दलं पर्णं छदः पुमानित्यमरः ॥ सप्तपर्णः विशालत्वक् ॥ समिद्वरः किंशुकः । पर्णः स्यात्सुं सि किंशुक इति लोचनः ॥ क्षारश्रेष्ठः पलाशश्च बीजस्नेहः समिद्वर इति धन्वंतरिः ॥ उग्रगंधा जमोदा । खराह्वा कारवी पर्णी मोदा हस्ति मयूरक इति धन्वंतरिः ॥ शाम्याकश्चतुरंगुलः ॥ माहा ह्वीलनिका स्थिरा । त्रिपर्णी पर्णिनी पर्णी महाह्वीलनिका स्थिरेति केयदेवः ॥ बाणेति॰ नीलझिंटी नीलपुष्पसहचरः ॥ इत्कटो मुंजः ॥ वेणुरिति॰ इक्षुः दीर्घपत्रः ॥ वंशस्त्वक्सारः ॥ शोणहृति॰

पर्णं पलाश पर्णेस्त्र सप्तपर्णे समिद्वरे ॥ पर्ण्युग्रगंधा शाम्याक महाह्वीलनिकासु च ॥ बाणा ह्वयो नीलझिण्ट्यां बाणा इत्कटके पुमान् ॥ वेणुरिक्षौ च वंशे च शोणो हि लोहवि भुंजि ॥ णत्रि अरुणा ति विषायां च हेमायां त्रिवृताभिधे ॥ अलम्बुषा रक्तपादावड्ग्रन्थासु च योषिति ॥

टिं टुः श्योनाकः ॥ हविर्भुक् चित्रकः ॥ णत्रि ॥ अरुणेति॰ अतिविषास्तुक्कंदा ॥ हेमा मंजिष्ठा ॥ पद्मेन्द्रगोपहेमा विज्ञाना लोहितलोहितमिति वाग्भटः ॥ त्रिवृताभिधः ॥ त्रिवृतो द्विविधं मूलं शोणं तं श्यामम एव च ॥ अरुणं त्रिवृदाख्यं तु श्यामं श्यामाह्वयं मनमिति ॥ त्रिवृत् तुंभः कुटरणा त्रिभंडी त्रिवृता परा ॥ श्यामा मसूरविदला पालिंदी सरलात थेति हृदयदीपकः ॥ अलंबुषा मुंडी ॥ विषघ्न मुंडी सुगंधि श्रवकदं वा भपला स्थि

उषणमिति० कणा पिप्पली॥मारीचं शिरोऽम्भुतं॥अथ कच्छूरमिति० हलीमः केतकी हठः वारिपर्णी॥ वारिपर्णीतो
यत्र स्रोतो हठः पानीयपृष्ठजेति केयदेवः॥किरातः किराततिक्तः॥रामकर्पूरः ध्यामकम्॥अथ गंधतृणे राम
कर्पूराख्ये हि कत्तृणमिति सिंहः॥मालातृणं भूस्तृणं च शतपुष्पो ग्रगंधिनीति च सिंहः॥तत्र रामकर्पूराख्यं
वकुपुत्रकांडं कर्पूरगंधं सुगंधि॥भूस्तृणं तु शतपुष्पिकावदुत्तारगंधं भूलग्नमिति भेद इति मुकुटः॥जरणं
इति० रुचकं लघुगंधं॥कृष्णं कृष्णलवणं॥जीरमजाजी॥हिंगुरामठं॥तरुणमिति० कुब्जपुष्पं कुब्जकः॥

उषणो षणो कणायामूषणं मुषणं च मारीचे। अथ कच्छूरणं हलीमे हठे किराते पि रामकर्पूरे॥जरणो रुच
के कृष्णे जीरे स्त्रीवं तु हिंगुनि॥तरुणं न स्त्रियां कुब्जपुष्पे पञ्चाङ्गुले पुमान्। पूरणं पिष्टभेदे च पूरणी शा
ल्मली द्रुमे॥ वारुणी गण्डदूर्वायां विशालाश्वेतयोरपि॥ब्रह्मणी ब्रह्मचारिण्यां फञ्जीमोहनयोरपि॥ ॥

पंचांगुल एरंडः॥तरुणो पुनि नवके कुब्जपुष्पो रुचकयोरिति लोचनः॥पूरणमिति० पिष्टभेदस्स्यष्टम्॥
शाल्मली रक्तपुष्पा॥वारुणीति० गंडदूर्वा गंडिनी॥विशालाइंद्रवारुणी॥श्वेता सुराभेदः॥पुनर्नवाशालि
पिष्टैः कृता श्वेता च वारुणीति केयदेवः॥ब्रह्मणीति० ब्रह्मचारिणी ब्राह्मी ब्राह्मणी स्मारिणी ब्राह्मी मंडूकी
ब्रह्मचारिणीति धर्मिष्ठः॥ब्राह्मी पिच्छिलापीतपुष्पिका॥भूस्कन्धावक्रधः शाम्बी द्वितीया तिक्तकामदु
:॥तृणवत्तृणकाचेति॥फंजी भार्गी॥मोहनाम्लिका॥ ॥ ॥ ॥ ॥ ४३

रिङ्गिणीति॰॥मृगगांधामुद्गपर्णीवनजाक्षिविषिंगिणीति केयदेवः॥ कंटकारी बृहती॥ रोहणइति॰ चंदनं श्रीखंडः॥रोहणश्चंदनद्रुमइतिहारावली॥ मलयस्तुस्यात्श्रीखंडोरोहणश्चसइति पुरुषोत्तमः॥कूट शाल्मलीः॥रोहितोलोहितोरक्तो रक्तघ्नः कूटशाल्मलिः॥ प्लीहघ्नोदाडिमीपुष्पोरोहणः पारिजातकइति धर्मिष्ठः॥गोमयप्रियः॥भूस्तृणोगोच्छलःश्वंगोरोहणोगोमयप्रियः॥विषाणीति॰ मधुरा क्षीरकाकोली॥कूर्चपर्णीमेषशृंगी॥वृश्चिकालीमेषशृंगी कूर्चपर्णीविषाणिकेति केयदेवः॥कुष्ठं पारिभाव्य

।रिङ्गिणीमृगगन्धायांकण्टकार्य्यांचयोषिति॥रोहणश्चन्दने कूटशाल्मलौगोमयप्रिये॥
।विषाणीमधुराकूर्चपर्ण्योःकुष्ठेतुनद्वयोः॥श्रावणीश्रावणेमुंड्यांजटामांस्यांसुदर्शने॥

म्॥श्रावणीश्रावणेइति॰ श्रावणीश्रावणमुंडीतिहृदयदीपकः॥श्राविणी श्राविता पूर्वंगात्रेयेनमहात्मना॥आत्रेयस्यैवचैकस्यतेनसाश्रावणीमतेतिधान्वंतरीयाः॥जटामांसीभूतजटा।मांसीमाताभूता जराजटामांसीतपस्विनीतिधर्मिष्ठः॥सुदर्शनामुंडितिकामांसीषुश्रवणांविदुरितिविश्वः॥सदर्शनः दध्याली॰ सुदर्शनासोमवल्लीचक्रांकामधुपर्णिका॥वत्सादनीचदध्यालीमेचकामेपकातथेति

॥ ६९ ॥

शिवप्र०
४५

श्रीपर्णीति० हंवावारिपर्णी ॥ सुटी गंभारी ॥ सप्तपर्णो विशालत्वक् ॥ कटूफलः कटुफलः ॥ कुंभीपाटला ॥ शाल्मली स्थि
रायुः ॥ पुंडरीकं सितांभोजं ॥ अग्निमंथो ऽरणिः ॥ सरलीति० कुंदोमाध्यः ॥ सपरली प्रसारणी ॥ प्रसारणी सुप्रसरासा
रणी सरली चसेति केयदेवः ॥ सुषेणीति० त्रिवृत्ताभित ॥ मसूरविदला काला का लमेषी सुषेणी केति केयदेवः ॥
आविघ्नः पाकरूप्यफलः ॥ वानीरो वेतसः ॥ नसनो मंजरी नम्रः सुषेणो गंधपुष्पक इति धर्मिष्ठः ॥ सुपर्णा इति०
कृतमालकः शम्याकः ॥ सुष्ठुपर्णान्यस्य शोभनो वर्णो स्येति चेति रामाश्रमाः ॥ कमलिनी नलिनी ॥ पर्णः सप्तपर्णः ॥

मूं० २ ॥ श्रीपर्णीतु हठे मुंजे सप्तपर्णे च कट्फले ॥ कुंभ्यांच शाल्मलौ स्त्रीबं पुंडरीकाग्निमन्थयोः ॥ सरली कुन्दसार
ण्योः सुषेणा त्रिवृताभित्पुंस्याविघ्ने च वानीरे सुपर्णः कृतमालके ॥ सुपर्णा कमलिन्यां च सुपर्णी पर्णसोम्ययोः सुव
र्णजोंगके स्त्रीबं काञ्चने हरिचन्दने हरेणुः ॥ स्त्री रेणुकायां सत्तु पुंसि सतीनके ॥ णचा ॥ चारुपर्णी भद्रपर्ण्या घारु
पर्णो मुनिप्रिये ॥ ॥

सोम्या शालिपर्णी ॥ सुवर्णेति० जोंगकं अगुरु ॥ कांचनं हेम ॥ हरिचंदनं शुक्लचंदनं ॥ हरेणुरिति० रेणुकाकौंतीस
तीनकं कलायः ॥ प्रज्ञाघणी सातीनो पीतिमाधवी ॥ त्रिपुटः खेडिकः सात्या वज्रबीजा कलायिका ॥ श्यामो तिवर्तु
लः स्यात्कंकटः सहरेणुक इति सिंहः ॥ कलायेपि हरेणुर्ना रेणुकायां स्त्रियां भवेदिति रुद्रः ॥ कलायस्त्रिकटः
च धातकीति॥ पारिभद्रकः पारिजात[illegible]ः॥ बीजपुष्प इति॰ मदनको राढः॥ मदनश्छर्दनो ६५
राढः श्वसनो विषपुष्पकः॥ बीजपुष्पो मरुवको मातुलो गालवोपि चेति धर्मिष्ठः॥ जूर्णाह्वेप
सिद्धं॥ फणिज्झको मरूकः॥ महापुष्प इति॰ काञ्चनारः कोविदारः॥ मूलश्लक्ष्णशाल्मोदनोप

मधुपुष्पमिति ॰ विशल्याकलिहारी ॥ कलिहारी लांगलिनी हलिनी गर्भपातिनी ॥ दीप्तिर्विशल्या
ऽग्निमुखी हली नक्तेंदुपुष्पिका ॥ विद्युज्वालाग्निजिह्वेत्यभिधानचूडामणिः । कलिकारीत्यपि ।
शिरीषो मृदुपुष्पः । गुडपुष्पो मधूकः । मधुपुष्पो मधूकश्च गुडपुष्पो मधुद्रुम इति हारावली ॥
मरुपुष्प इति ॰ नलः पोटगलः ॥ काशश्चामरपुष्पः ॥ इक्षुपुष्पापरपर्यायः ॥ भूतावासः कलिद्रुम
॥ इक्षुरसिपत्रः ॥ वेणुर्यवफलः ॥ रक्तपुष्प इति ॰ कुरवको रक्तपुष्पसहचरः । अगस्तिरगस्त्यः ॥ आ

मधुपुष्पे विशल्यायां लांगलीशिरीषयोर्गुडपुष्पके मरुपुष्पो नलेकाशे भूतावासेक्षुवेणु
षु रक्तपुष्पः कुरवकागस्तिशाल्मलिरोहिणि । पलाशतुङ्गचण्डातबन्धुजीवम
नोहरे रक्तपुष्पा चर्मरङ्गासिन्दूरीतरणीभिदि रक्तपुष्पी रुद्रहारजपापाटलिपर्प्यटे

रसपुष्पे त्वागस्त्यो माञ्जरी रक्तपुष्पक इति सिंहः ॥ शाल्मलिश्चिरायुः ॥ रोही दाडिमपुष्पकः । पला
शः किंशुकः ॥ तुंगो हि केसरः ॥ चंडातो रक्तकरवीरः ॥ बंधुजीवः शरत्पुष्पः । मध्यपुष्पः बन्धूकपु
ष्पः । बंधूक इति पर्यायाः ॥ मनोहरः वरलक्षः काञ्चनको भ्रमरेष्टो मनोहरः रक्तपुष्प इति केयदेव
॥ काञ्चनारभेदः ॥ चर्मरंगा ॥ आवर्त्तकी ॥ सिंदूरी रक्तबीजा स्याद्रक्तपुष्पा सुकोमलेति केयदेवः
॥ तरणीभित्त्वाष्टापुष्पा ॥ आतपत्रीतरणपुष्पा कर्णिका चारुकेसरा ॥ रक्तापरा रक्तपुष्पा लक्ष्मा

पुष्पा ॥ तिमंजुलेति मदनमालः ॥ रुद्रहारं वस्त्र
री ॥ जपा जवा ॥ पाटलिः पाटला ॥ पर्प्यैरिरजः ॥

शिवम्· वृत्तपुष्पीति॰ नागदन्तीनामविन्त्या॥ लोके तु नागदमनिरित्याख्यया ख्याता॥ मल्लीराजपुष्पी॥
६६ वदंवः कुसितो वः। वृत्तपुष्पः प्रान्द्रेषे ल्योह रिद्रुध्वहल्लिप्रिय इति हारावली॥ धूलीकदंबो वसं
तपुष्पः॥ मल्लीभित् चिचिकिल्लः वानीरो वृत्तः मृदुपुष्पः शिरीषः। बृहत्पुष्पीति॰ शणः घंटार
68 वामात्यपुष्पी शणपुष्याल्यघंटिका॥ घंटाशब्दा बृहत्पुष्पीति शणघंटापुष्पिकेति धर्म्मदा
सः॥ कुब्जो वक्रकंटकः। चिबुकः॰ प्रतिविम्बुकः। मुचकुंदापरपर्यायः। केतकः स्पष्टः॥

वृत्तपुष्पी नागदन्त्यां पुंसि मल्ली कदम्बयोः धूलीकदम्बमल्लीभिद्वानीरमृदुपु
ष्पके बृहत्पुष्पी शणे कुब्जे चिबुके केतके तु ना शतपुष्पा शताह्वायां क्लीबे स्यात्पु
ण्डरीयके शङ्खपुष्पी तु यूथीभित्कम्बुमालिकयोः स्त्रियाम्

शतपुष्पेति॰ शताह्वा मिसिः॥ अवाक्पुष्पी वज्रपुष्पीति समानार्थाः। पुंडरीयकं प्रपौंडरी
कं॥ शतपुष्पं पौंडरीकं सुपुष्पं पुंडरीयकमिति धर्म्मिष्ठः॥ गुल्मावइति ख्यातः। शङ्खपुष्पी
ति॰ यूथीभित्। हेमपुष्पी पीतपुष्पी बालपुष्पा गुल्मो व्राला॥ अपराशिखंडिनी काष्ठापां ६६
डुराशंखपुष्पिकेति धर्म्मिष्ठः॥ कंबुमालिका मंगल्यपुष्पी॥ शंखपुष्प्यासितापले॥ व
ल्लिकेत्यागे विश्वकृत्तो मशे ल्यकपत्रके इति॥ ॥ ॥

शाणपुष्पीति॰ शाणः॥ घंटारवा तु शाणपुष्पिकेत्यमरः॥ तूलः कर्पासः॥ शिवपुष्प इति॰ अर्केऽपि
कापष्ठं कमलं॥ शीधुपुष्पीति॰ ताम्रपुष्पी धातकी॥ शीधुपुष्पी ताम्रपुष्पी च वह्निपुष्पी च धा
तकीति धर्मदासः॥ पंचाशन्ति दिवसानि भंगमा धातकीपतनया मकी भवेति कश्चित्॥ वंगसेनोऽ
गस्तिः॥ सीधुदंसा दिश्च॥ शुकपुष्प इति॰ शुकतरुः शिरीषः॥ शुकपुष्पः शुकतरुः श्यामवर्णः
शुकप्रियः॥ शिरीषः कलिमो विश्रामः पुष्पः कपीतन इति कैयदेवः॥ शुकच्छदस्योपलं श्वेत

शाणपुष्पी शणे तूले शिवपुष्पोऽर्कपद्मयोः शीधुपुष्पी ताम्रपुष्प्यां वङ्गसेनान्तराव ॥
पि शुकपुष्पः शुकतरौ शुकपुष्पं शुकच्छदे श्वेतपुष्पः शतप्राशे वरुणे सिन्दुकुन्दयोः ॥
श्वेतपुष्पी महाश्वेता गणरूपकुटन्नटे सदापुष्पी द्वयोरर्के कुन्दे लर्के तु पावित ॥

पुष्प इति॰ शतप्राशो वृन्तबीजप्ततः। करवीरश्च हाश्वघ्न इति कैयदेवः॥ वरुणस्तिक्तशाकः॥ शी
धुष्पः श्वेतपुष्पस्तिक्तशाकश्च लापह इति कैयदेवः॥ अथ सिन्दुकः॥ सिंदुवारे द्रुसुरसौ निर्गुं
डी दालिकेत्यपीत्यमरः॥ मुकुटस्तु धमिल्लुतिः वाकुजकादत्र धोनिस्यन्वोसिंदुः श्वेतपुष्पः सिंदु
वारितः अपरस्तु॥ नीलपुष्पः शीतसहो निर्गुंडी नीलसिंदुवारस्तु जः मेउडीति लोके॥ कुंदो माध्यः॥
महाश्वेतापराजिता॥ गणरूपोऽर्कः॥ कुटन्नटं मुस्ताभेदः॥ सदापुष्पीति॰ अर्कोऽलूपिका॥ अलर्को

स्वर्णपुष्पीति॰ नागदन्ती नागपत्री॥ नागदन्ती नागपत्री राक्षसा सर्वग्रहापहेति धर्मिष्ठः॥ केतकी क्रकचच्छदा॥ सुरभिश्चंपकं॥ सुपर्णः शंपाकः॥ चर्मकेशी सातला॥ अग्निजिद्धारं दुपुष्पी॥ कलिकारी लांगलिनी हलिनी गर्भपातिनी॥ दीप्तिर्विशल्याग्निमुखी हली नक्तं दुपुष्पिका॥ विद्युज्ज्वालाग्निजिद्धेत्यभिधानचूडामणिः॥ सितपुष्प इति॰ सितरोही श्वेतपुष्पो रोहीतः॥ कुंदो माध्यः॥ सुशुक्ला रात्रिपुष्पिका॥ दंतोज्वला कुंद सा केति केयदेवः॥ वन्यं कुष्टं टंनटं॥ कुटंनटं प्लवं च

स्वर्णपुष्पी नागदन्त्यां केतक्यां सुरभौ तना सुपर्णे स्वर्णपुष्पा तु चर्मकेश्यग्निजिद्धयोः सितः पुष्पः सितरोहिणि कुंदे वन्ये तु सितपुष्पम सितपुष्पी मधपुष्पा करभी मकूस्य पुष्पीपु

न्नगोनर्दे गोपुटं पुटं॥ सितपुष्पं सदापूरं वितुन्नं परिपेलवमिति केयदेवः॥ मधपुष्पा शतपुष्पा॥ अवाक्पुष्पी वज्रपुष्पीति समानोर्थः॥ करभी श्वेता पराजिता॰ श्वेतपुष्पा वाजिखुरा श्वेता पाटलि पिंडिका॥ अपराप्यजगंधा कानीलपुष्पी गवादनीति केयदेवः॥ मंगल्यपुष्पी ६७
शंखपुष्पी॥ क्षीरपुष्पीः कंबुपुष्पी॰ अन्या रक्ता रक्तपुष्पी॥ अपरा नीला नीलपुष्पीति॥ चोरपुष्पीति॰ सामान्यं नामतिसृणां रात्रिविकासित्वात्॥ ॥

स्थिरपुष्पइति॰ हेमपुष्पश्चंपकः॥ पीतपुष्पः दीपपुष्पइत्येकार्थाः॥ छिन्नपुष्पस्तिलकः॥ स्त्रीनि
रीक्षणदोहदः॥ सूक्ष्मपुष्पेति॰ अक्षपीडायवतिक्ता॥ शणाधमः स्वल्पतंतुशणजातिः॥ हेमपु
ष्पइति॰ अशोकः स्त्रीपादहतिदोहदः॥ रोध्रोऽस्त्रिभेषज्यं॥ चंपकश्चांपेयः॥ आरग्वधः संपाक
॥ भंडीयोजनवल्ल्यपि॥ रक्ता भंडीरिका चेतीदुः॥ भांडीरी च॥ हेमपुष्पी च भांडीरीतिरभसः।
मंजिष्ठायां तु भंडीरी ऋस्वमध्याऽपि दृश्यत इति — द्विरूपकोषः॥ वारुणीरंद्र वारुणी॥ यू

स्थिरपुष्पो हेमपुष्पश्छिन्नपुष्पकयोरपि सूक्ष्मपुष्पाक्षपीडायां सूक्ष्मपुष्पी शणाध
मे हेमपुष्पोऽशोकरोध्रचम्पकारग्वधेषु च हेमपुष्पी तु भण्डीरीवारुण्योर्यूथिकाभि
दि हेमपुष्पं जवापुष्पे पाठायां नागकेसरे पद्मे काञ्चनपुष्पी यूथीभिन्माधवीपाटला
सु च चामरपुष्पः पूगमाकंदकेतकेकाशे दाडिमपुष्पो रोहिणितूलिन्योर्दाडिमीपुष्पं =

पिकाभिसीनयूथी॥ जवापुष्पं जपापाठा अंबष्ठा॥ नागकेसरः करिकेसरः॥ पद्मं॥ कांचन =
पुष्पीति॰ यूथी भिसीत यूथी॥ माधवी अतिमुक्तः॥ पाटलापाटलिः कामदूतिकाकालवृ
न्तिकेति केयदेवः॥ चामरपुष्पइति॰ पूगः क्रमुकः माकंदः रसालः॥ केतकः क्रकचच्छदः॥
काशः चामरपुष्पः॥ दाडिमपुष्पइति॰ रोहीरोहीतकः॥ तूलिनी

वन्धूकपुष्पइति० प्रियकोसनः॥ वंधुजीवः शरत्पुष्पः॥ अथस्यान्महिलकापुष्पइति० करुणः सुगंधिपुष्पः
॥ अनेनैवनाम्नाख्यातः॥ नाम्नेवहंतकरुणेकरुणेसिमयइतिभंगंप्रतिकस्यापिपुक्तिः॥ कुटजइंद्रवृक्षः॥ पा
ताः॥ वद्धि॥ द्राक्षीति० दारुहरिद्रापचंपचा॥ हरिद्रापीता॥ देवदारुदेवकाष्ठं॥ गोजिह्विकागोजिका० गोजिह्वा
गोजिकागोभीदार्विकाखरपर्णिनीति॥ निम्बइति० ह्रीवेरंजलनामकं॥ पिचुमर्द्दः॥ पिचुमंदः॥ विम्बइति०॥ विं

वन्धूकपुष्पः प्रियकेवन्धुजीवसुमेद्वयोः अथस्यान्महिलकापुष्पः करुणेकुटजेपिच पाञ्चाः वद्धि
द्राक्षीदारुहरिद्रायांहरिद्रादेवदारुणोः गोजिह्विकायान्निम्बस्तुह्रीवेरपिचुमर्द्दयोः विम्बफलेविम्बि
कायाविम्बएरण्डधीरयोः वन्त्रिकलम्बीनाडिकाशाकेकलम्बोहरिवल्लभे करम्भः सर्षपेनीपेगजा
ह्वंकरिकेसरे गजाह्वाकरिपिप्पल्यांगोडुम्बः शीर्णवृन्तके गवाद्म्यांच

॥ २ ॥ [illegible]

११ बकारक्तफला॥ एरंडः पंचांगु
लः॥ धीरंकुंकुमं॥ वन्त्रिकलम्बीति० नाडिका शाकः नालीयः॥ पुंसिचकलंबः शाकभेदेपिस्यादिषुशरयोः
पुमान्॥ टवर्गद्वितीयमध्येपिकडंवश्चकलंवश्चेत्यमरः॥ इशाकनालस्येतिरामः॥ कदंबोनाडिकाकारः
सुषिरोवक्रतोयजः॥ नालिकातस्मादल्पासूक्ष्माचेतिहेमाद्रिः॥ हरिवल्लभः मत्स्येषणः॥ करम्भइति० सर्ष
पः सरिषपः॥ नीपः कलंबः॥ गजाह्वमिति० करिकेसरोनागकेसरः॥ स्वर्णभिसपर्याख्योनागकेसरः॥ षट्
पदप्रियइतिरभसः॥ करिपिप्पलीचव्यपुष्पं॥ गोडुंबइति० शीर्णवृन्तंचित्रंफलंसेंधिरतिलोके॥ गवा ६८

भूजम्बूरिति॰ स्वल्पजंबूः नादेयी॥काकजंबूर्मेघवर्णा नादेयी विदिशोल्मक इति धन्वंतरिः॥नादेयी स्वल्पजंबूः॥
स्यादिति भावगुणनाममाला॥विकंकतः स्रुवतरुः॥भूजंबूस्तु विकंकते॰ गोधूमाढ्यधान्ये चेति हैमः॥गोधूमा
ढ्यधान्यं प्रसिद्धं॥नागरंगो नार्यंगः॥नारंगो नार्यंगः स्वक्षवासनः॥ऐरावत श्चेति सेवस्या नादेयी भूमिजंबुके
ति सिंहः॥वच॥तिक्तपर्वेति॰ यष्ट्याह्वं यष्टीमधु॥हिलमोचीमूलकं॥अमृता गुडूची॥राजजंबूरिति॰ जंबूभि
दः॰ महाफलजंबूः॥जंबूः सुरभिपत्रा च राजजंबूर्महाफला॥सुरभी च महास्कंधा महाजंबूर्निगद्यते॥पिंडख

भूजम्बूः स्वल्पजम्ब्वां विकङ्कते गोधूमाढ्यधान्ये च नागरङ्गे चयोषिति वच तिक्तपर्वोतु यष्ट्याह्वे हि
लमोच्यमृतासु च राजजम्बूस्तु जम्बूभित् पिण्डखर्जूरयोः स्त्रियाम् शतपर्वा दीर्घपत्रभेदे यवफ
लेनले शतपर्वा तु भार्गव्यां वचाकटुकयोरपि वपम् धूलीकदम्बस्तु निशे निम्बे वरुणनीपयोः

र्जूरः स्वल्पा खर्जूरजातिः॥शतपर्वेति॰ दीर्घपत्रभेद इक्षुभेदः॥शतपर्वक कांतारनेपालाद्यास्ततःन
माप्तिति वाग्भटः॥यवफलो वेणुः॥नलः पोटगलः॥भार्गवी नीलदूर्वा॥नीलदूर्वा रुहानंता भार्गवी शत
पर्विकेति॥वचोग्रगंधा॥कटुका मत्स्यपित्ता॥वपम्॥धूलीकदम्ब इति॰ निशः स्पंदनः॥निम्बः पिचुमंदः
॥वरुणस्तिक्तशाकः॥नीपो राजकदम्बः॥कदंबो गंधपुष्पः स्यात्प्रावृषेण्यो महोन्नतः॥अन्यो धूलि
कदम्बः स्यान्नीपो राजकदंबकः इति भावगुणनाममालानी पो वृहत्कह समीपभुवि प्रभूतो लोकप्रसि
द्धतरराजकदंबनामा॥प्रांशुर्मधूकतरुपत्रसमानपत्रः स्वाद्वम्लपक्वफल एष सुगंधिपुष्प इति॥

।शिवप्र॰ शृगालजम्बूरिति॰ गोडुंबो गवादनी फलं॥ घोंटाफलं पूगफलं॥ वाताः॥ भद्धि॥ कुम्भमिति॰ त्रिवृत्सा
६९ लिंदी॥ गुग्गुलुः पुरः उलूखलं च कुंभं च कुंभोलूखलकं तथेति सिंहः॥ गुग्गुलुर्गुग्गुलोपि चेति द्वि
69 रूपकोषः॥ भद्राका फलः॥ कट्फलापरपर्य्यायः॥ स्थाली पाटला॥ हवः वारिपर्णी॥ पृश्निकायां च
कुंभी स्यात् साटलो कट्फलेपि चेति रंतिदेवः॥ रम्भेति॰ मत्सुपुष्पा कदली॥ षट्पदालयो वंशः॥

शृगालजम्बूर्गोडुम्बे स्त्रियां घोण्टाफलेपि च वाताः भद्धि कुम्भं त्रिवृद्गुग्गुलयोर्भद्राहस्थाली
हवे स्त्रियाम् रम्भा तु मत्सुपुष्पायां स्यादंभः षट्पदालये शुभा तु श्वेतदूर्वायां एक्कावांशीश
मीष्वपि

शुभेति॰ श्वेतदूर्वा दूर्वाभेदः॥ शृङ्का कुटिला॥ वांशी वंशरोचना॥ वंशपर्वस्थरोचना॰ शुभ्रा सा
तुगा क्वचिद्वंशे खंजरीटरतान्वित इति॥ शमी सक्तुफला॥ शिखंडि शांडिल्य शमीच्छिशाशां इति ता ६९
लव्यादि॥ सरला विरलायंते घनायांते कलिद्रुमाः॥ न शमी न च पुन्नागा अस्मिन् संसारकानन
नश्यति॰ कस्यापि॥ ॥

भत्रि॥ऋषभीति॰शूकशिंबा कपिकच्छूः॥शुकशिंबा इति च॥माषवल्ली शूकशिंबा कर्कटशृंगी
रूबूका ऽश्वगंधानामिति चक्रः॥बीजकोशी शिंबा शमी शमिः॥शिंबिरिति हेमः॥दुर्धरो वृषः॥ऋष
भो दुर्धरो धीरो विषाणी गोःपति वृष इति वैजयंती॥ऋषभकेति ख्यातः॥कटभीति॰गिरिकर्णी
अपराजिता॥ज्योतिष्मती कंगुणिका।पारावती श्रिः कटभी पण्या ज्योतिष्मती लतेत्यमरः॥द्रुमि
कच्चकर्तह इति ख्यातो वृक्ष इति प्राच्याः॥कटभी स्वादुपुष्पश्च मधुरेणुः कटंभर इति भावमिश्रः।अ

भत्रिरृषभी शुकशिम्बायामृषभो दुर्धरे पुमान् कटभी गिरिकर्ण्यां च ज्योतिष्मत्यां द्रुमेऽपि
अथो कुसुम्भः कनके स्यान्महारजनेऽपि च सुरभिश्चम्पके स्वर्णे नवमल्ल्यां हरिप्रिये मरासुराफले
((लेये शल्लकीगन्धराजयोः

थो कुसुम्भ इति॰कनकं हेम॥महारजनं लकुच॥कुसुंभं हेम निम
हारजनेना कमंडलुवितिलोचनः॥सुरभिरिति॰चंपको हेमपुष्पः॥स्वर्णं कनकं॥नवमल्ली मल्लिका
भेदः॥हरिप्रियः कालसारः मुरा गंधकुटी॥सुरभिः शल्लकी मातृ मिन्मुरवारा गोषु ये।बिनीति मेदिनी॥
सुरामद्यं सुरभिश्चंपके चैत्रे वसंते गंधके कफौ॥स्वर्णे जातीफले चाथ त्रिषु मद्य सुगंधयो रिति विश्वलोच
नः॥फलं जातीफलम्॥एलेयं एल वालुकं॥शल्लकी गजभक्ष्या॥गंधो गंधोपलः॥रा स्नारसा॥॥

भयम्॥ शुकवल्लभ इति॰ शिरीषो मृदुपुष्पः॥ दाडिमस्य फलं करकः॥ भान्ताः॥ मह्धि॥ उमेति॰ रक्तपत्रा अतसी॰ रुद्रपत्नी रक्तपत्रा नीलपुष्पी सुवर्चला॥ उमा त्तसी च मसृणा वेणुः क्षौमी क्षुमा स्मृतेति निघण्टुः॥ हरिद्रा निशा॥ अथ क्षुमेति॰ अतसी रुद्रपत्नी॥ नीला नीलिनी॥ क्षेम इति॰ चंडा चोरकभेदः ईषत्कृष्णः अजमोदाकार इत्येलादिगणे उक्तः॥ चोर

भयम्॥ शुकवल्लभः शिरीषे दाडिमस्य फले पिच॥ भान्ताः। मह्धि। उमातु रक्तपत्रायां॥ हरिद्रायामथ क्षुमा॥ अतसी नीलयोः क्षेमश्चंडा चोरकयोर्द्वयोः॥

कोऽयं ग्रन्थिपर्णकभेदस्तदाकार एवैत्येलादिगणे उक्तः॥ चोरको गोपनः क्षेमोऽदुः पुत्रोऽदुः कुलोपरा॥ क्रौ धना पिशुना चंडा चौरी शंखिनि काशटीति निघंटुः॥ क्षेमः स्यात्क्षधरक्षणे॰ मंगले चोरके वा स्त्री क्षेमा चंडा हरिद्रयो रितिलोचनः॥ क्षेमं स्यात्क्षधरक्षणे॰ चंडायां नाशुभेन स्त्री कात्यायन्यां च योषितीति मेदिनी॥ ॥ ७०

ध्यामइति॰ दमनः सर्वांगसुरभिः ॥ गंधद्रव्यमत्ररौहिषकं ॥ ध्यामकं रौहिषं भूतिर्भूती कं रौहिषं तृणमि
तिमाला ॥ पद्मइति॰ पद्मं कर्बोगुग्गुलुः । अव्यथापथ्यचारिणी ॥ अव्यथाति चरा पद्मा चारटी पद्म
चारिणी त्यमरः । फंजिका भार्गी भृगुभवा पद्मा फंजी ब्राह्मणयष्टिकेति निघंटुः ॥ चन्द्रनेष्ठीतिख्या
ता ॥ पद्मकं पद्मकाष्ठं ॥ अंबुजं कमलं ॥ ब्राह्मीति॰ फंजिका भार्गी ॥ सोमवल्करी मीनाक्षी ॥
ब्राह्मीवयस्थामत्स्याक्षी मीनाक्षी सोमवल्करीत्यभिधानचूडामणिः ॥ शाकभिदत्रस्थ क्वा

ध्यामो दमनके गन्धद्रव्ये पद्मः पलङ्कषे ॥ पद्मा व्यथा फञ्जिकयोः पद्मोऽब्जे पद्मके
म्बुजे ॥ ब्राह्मी तु फञ्जिका सोमवल्करी शाकभित्स्रुच । भीमः कुम्भोलूखलके वकपुष्पे च
वेतसे ॥ रामा श्यामा हिङ्गुनाड्योः क्लीवं वास्तूककुष्ठयोः ॥ रामः पुमान्कर्णपूरे ॥ ॥

भीमइति॰ कुंभोलूखलकं कुंभं ॥ वकपुष्पोऽर्कभेदः ॥ वेतसं चुक्रम् ॥ क्षुद्रजं वीरसंभूतोर
सः संशोषितोरवौ ॥ मद्रमत्र वेतसारं क्षुद्रजं वीरजं तु तत् ॥ स्वयं कृतं च मिश्रं तन्मध्य
मं क्षुद्रजाधममिति ॥ रामेति॰ श्यामा प्रियंगुः ॥ हिंगुनाडी हिंगुप्रकृतिः ॥ वास्तूकं वास्तुकं
॥ कुष्ठं पारिभाव्यं । कर्णपूरः शिरीषः ॥ ॥

शिवप्र० रुक्ममिति॰ कांचनं कनकं ॥ लोहमयः ॥ लक्ष्मीरिति॰ सक्तुफला शमी ॥ पद्मा पद्मचारिणी ॥ वृ
७१ द्धी स्वनामख्याते ॥ प्रियंगुर्लता ॥ शमीति॰ सक्तुफला यवित्रपत्रा ॥ शिवा शिविः ॥ गुग्गुलुः पु
रः ॥ श्यामेति॰ प्रियंगुर्लता ॥ सरला कृष्णमूला त्रिवृत ॥ गोपी श्यामा गोपवल्ली गोपा गोपालि
काचसेति वाचस्पतिः ॥ गुंद्रा एरका ॥ गुंद्रा शीरी गुच्छमूला वानीरः पृथुलः खरः ॥ एरका च

रुक्मकाञ्चनलोहयोः ॥ लक्ष्मीः सक्तुफलापद्यावृद्धिस्वृद्धिप्रियङ्गुषु ॥ शमीसक्तु
फलाम्यांस्यात्स्त्रियांगुग्गुलावपि ॥ श्यामा प्रियङ्गु सरलागोपीगुन्द्राहरिद्रासु ॥
नीलीचपलासोमश्यामोवृद्धरुदारकेखदिरे ॥ श्यामंतुकाललवणेमारीचेभूस्तृणेकुम्भे ॥

शितिः प्रोक्तेति केयदेवः ॥ गोंदन इति लोके ॥ हरिद्रा निशा ॥ नीली नीलिनी ॥ चपला पिप्पली
॥ सोमः सोमवल्लीयज्ञांगभूता ॥ अब्दो मुस्ता ॥ वृद्धदारकः छगलं ॥ खदिरो बालपत्रः ॥ का ७१
ललवणं ॥ कृष्णलवणं ॥ मारीचं मरिचं ॥ भूस्तृणं भूतीकं शतपुष्पा यगांधि ॥ कुंभमुलूखव

सामेति॰ ब्राह्मी ब्रह्ममंडूकी॥ सोमराजी मल्लिना॥ वावचीति लोकख्याता॥ पृथुका गुरवोयत्र कुंकुं
कुंयत्र गदापहं। सोमराजी च मल्लिना वैद्यकेनन्वितं वह्निति पंकजभद्रः॥ कुंडली गुडूची॥ जलं
पानीयं॥ कर्पूरो हिमवालुका सोमलता यज्ञांगभूता॥ हिममिति॰ कर्पूरो हिमवालुका॥ शीतलं
दृनं॥ मत्रि॥ उत्तममिति॰ सिंधुजं वरं॥ दुग्धिका भूलग्ना वल्ली प्रसिद्धा॥ फलत्रिकं तुल्यफला त्रि
फला चवरोत्तमेति धर्मिष्ठः॥ गोलोमीति॰ श्वेतदूर्वा गंडाली॥ गोलोमी श्वेतदूर्वायां स्याद्वचा

सोमा ब्राह्मी सोमराजी कुण्डली बुधुमाम्जले॥ कर्पूरसोमलतयोर्हिमं कर्पूरशीतयोः॥
मत्रि उत्तमं सिन्धुजे स्त्री तु दुग्धिकायां फत्रिके। गोलोमी तु श्वेतदूर्वा भूतकेशी वचासु च
गोधूमस्स्यान्नागरङ्गः शूकधान्यप्रभेदयोः॥ दाडिमस्तु त्रिलिङ्गः स्यादेलायां करकेपि च

भूतकेशयोरिति मेदिनी॥ भूतकेशी जटामांसी॥ अथ सा सिता। गोलोमी शतवीर्या च गंडाली
शकुलाक्षकइत्यमरः॥ वचा हेमवती॥ गोधूम इति॰॥ नागरंगः कं टकेसरपद्वितः॥ तत्रवास
नाभिधीनः॥ तद्भेदः कमलास्त्री स्यात्तद्भेदस्तु सदाफल इति सिंहः॥ शूकधान्यप्रभेदः प्रसि
द्धः॥ दाडिम इति॰ एला त्रुटिः॥ करकः शुकवल्लभः॥ दाडिम्बोपि॥ दाडिवसार पिंडीरस्वाद्व
म्लश्शुकवल्लभा इति रभसः॥ ॥ ॥ ॥

शिवम०

७२

विद्रुमइति० रत्नवृक्षः पारिजातः। प्रवालोऽप्यावयद्धरी॥ नवपल्लवः नूतनपत्रं॥ मच॥ कलिद्रुम
इति० दुरारोहः खर्जूरी॥ श्रीवासश्रीटा॥ विभीतकोऽक्षः॥ तृणद्रुमइति० हिंताल स्तालभेदः॥
लांगलीनारिकेरी॥ क्रमुकः पूगः॥ तलस्ताल॥ तलोऽन्यपक्षे लेख्यपत्रमहापद्यतलध्वजाः॥ ता
लेरितिसिंहः॥ खर्जूरीकृस्वाखर्जूरजातिः तालिकाकृस्वातालजातिः॥ ताडीवरांगना॥ ताल
त्रपत्रतालीचमत्स्यबीजापीतिसिंहः॥ खर्जूरीदुरारोहः॥ क्रकचच्छदः केतकीक्षोणीदलः सूचि

विद्रुमोरत्नवृक्षेपिप्रवालेनवपल्लवे॥ मच॥ कलिद्रुमोदुरारोहश्रीवासेचविभीतके।
तृणद्रुमस्तु हिन्तासे। लांगल्यांक्रमुकेतले। खर्जूर्यांतालिकायांचखर्जूरेक्रकचच्छदे
महाश्यामातुविज्ञेया शिंशपावृद्धदारयोः। मान्ताः। यष्टि। कन्याकुमारिकावन्ध्यास्थूलैला

पुष्पोजंबूलः क्रकचच्छद इति सिंहः॥ महाश्यामेति० शिंशमाकृष्णसारा॥ वृद्धदारोवेद्धरी॥ मांताः
॥ यष्टि। कन्येति० कुमारिकाघृतकुमारी॥ तरणिपिच्छिलामातामंडलागृहकन्यका स्सहाघृतकु
मारीचेतिसिंहः कुमारीक्षारभूदेशेपंक्तिकंटकदलाऽवला॥ विस्तातिवाटच्छुदिनीविशालापिच्छसं
भृता॥ ध्वजाभमध्यदंडासारुणराजिसुमापृथुः॥ सिद्धेवेति॥ वंध्याककोटकीदेवीकन्यायोगेश्व
रीतिचेतिनिघंटुः स्थूलैलाबृहदेला॥ स्थूलैलात्वकुसुगंधाचपृथ्वीकाकन्यकास्कुटितिधन्वंत ७२

केतृण मिति० वाल्कं कौबेरं ॥ भृंगराजो भृंगरजः ॥ चव्यमिति० कोला चविका० कोला चव्या चच विकेति हट्टचंद्रः। चव्यं तु चविके स्त्री वंच माद्रू वेग्निगंधयो रिति लोचनः ॥ अवनं गजपिप्पली ॥ च वनं कोल वल्ली च चव्यं कुंजर पिप्पली ति चंद्रनंदनां दूर्वा शतपर्वा ॥ उग्रगंधा वचा ॥ जयेति० अभ यापथ्या ॥ कायस्था श्रेयसी पथ्या प्राणदा विजया जयेति केयदेवः ॥ मातुलानी भंगाः ॥ भं गा तु विजया जयेति निघंटुः ॥ जयंती वल्ली मोटा ॥ वल्ली मोटा सूक्ष्मा फला जयंती विजया ज

केश्यन्तु वाल्के भृङ्गराजे चव्यं तु नोनरि। कोलायां चवने च मंच माद्रू वेग्निगंधयोः ॥
जया भया मातुलानी जयन्स्वरणि भित्सु च ॥ विनापि तेषु तार्क्ष्यं तु रत्नभेदे रसाञ्जने ॥

येति केयदेवः ॥ सा च पीतरक्त कृष्ण गुल्छपुष्पा शिरीष पत्राशं विनी वृक्षः कुल्यादि समीपे जायते ॥ अरणि भिद्र अग्निमंथ भेदः ॥ अग्निमंथो रणिः वैतुरस्त्र कुमारी वैजयंतिका ॥ गणिका पावकाद्या मा जयंती विजया जयेति केयदेवः ॥ विना० उपसर्गेण सह ॥ तेषु पूर्वोक्तेषु ॥ पथ्या विजया हरीतकी० ॥ विजे या मातुलानी स्यादि ॥ तार्क्ष्यमिति० रत्नभेदोत्र हरिन्मणि ॥ गारुत्मतं मरकतमश्मगर्भो हरिन्मणि रिति केयदेवः ॥ हरित्वच्छुं भास्वन्मरकतं मतमिति ॥ रसांजनं तार्क्ष्यजं तार्क्ष्यमिति हृदयदीपकः ॥

शिवप्र॰ दिव्यमिति॰ कोलं कंकोलं॥ लवं लवंगं॥ लवंगं देवकुसुमं भृंगारं शिखरं लवमिति केयदेवः॥ सूतः
७३ पारदः॥ शिवमामलकं॥ ब्राह्मीभारती॥ दीप्यइति॰ यवानीयवसाह्वा॥ मोदाअजमोदा॥ धन्येति॰ धा
73 त्रीआमलकी॥ वितुन्नकं धान्यकं॥ सधन्याशुंठिसैंधवमिति प्रयोगात्॥ पथ्येति॰ मुंडीकुल्हलः॥
विजयाहरीतकी॥ वंध्यावंध्याककर्कोटकी॥ पद्मापद्मचारिणी॥ सिंधुसैंधवं॥ तेनपथ्यापथ्यमपथ्ये

रिमं कोले लवे सूते शिवे ब्राह्म्यां तु योषिति। दीप्यो यवान्यां मोदायां धन्या धात्र्यां वितुन्नके॥ प
थ्या मुण्डी विजया वन्ध्या पद्मा सु पथ्यं तु॥ सिंधु निपाक्यं काचे विडे चपाक्योपवक्षारे। प्रिया॥
प्रियंगुका कोली मल्लिका रद्धि लद्धिषु। भव्या करिकणायां स्त्री कर्मरंगतरौ नरि॥ मेध्या ब्रा
ह्मी शङ्खपुष्पी गन्धाढ्या रोचनासु च॥ वाचायां पीततैलायां वेल्ले मेध्यपन्तु जीरके॥ ॥

पथ्यमितिसिद्धं॥ पाक्यमिति॰ काचो मदभित्॥ विडं विडलवणं॥ यवक्षारः॥ यवाः सश्शूकाः द
ग्धाश्च क्षारतामापितास्तथेति। प्रियेति॰ प्रियंगुर्वनिता। काकोली वीरा। मल्लिका वार्षिकी॥ वृद्ध
र्द्धी स्वनामख्याते॥ भव्येति॰ करिकणा कुंजरपिप्पली कर्मरंगतरुः॥ भावनतरुः मेध्येति॰ ब्राह्मीस्मा ७३
रिणी॥ शंखपुष्पी शंखाह्वा॥ गंधाढ्या सुरा॥ रोचना गोरोचना॥ वचा षड्ग्रंथा॥ पीततैलाज्योति
ष्मती॥ वेल्लं विडुंगं। जीरको जाजी॥

रम्यमिति॰पटोलमूलंप्रसिद्धं॥रात्रिर्हरिद्रा॥चंपकोहेमपुष्पः॥वम्रमिति॰क्षुद्रमुस्ताकुटंनटं॥परिपे
लवंप्लवंवम्रंतत्कुटंनटसंज्ञकं॥जायतेमंडुकाकारंशैवालदलसंचयेइति॥लवकूभंगं॥वाट्येति॰
वलाभिदितिवला॥वलावाट्यालकः॥रुकुष्ठं॥भ्रष्टयवोधानाः॥पुष्करंपुष्करमूलं॥वृष्येति॰स्वा
दुकंदाविदारी॥धात्रीआमलकी॥शाद्वलंहरिततृणं॥एतोमध्यतवर्गीयोवेदूर्धमणिशाद्वलाविति

रम्यंपटोलमूलेस्त्रीरात्रौपुंसितुचम्पके।वम्रंतुक्षुद्रमुस्तायांत्वक्पिवाट्याबलाभिदि
वलायामथवाद्यंतुरुक्स्त्रष्टयवपुष्करे॥वृष्यातुस्वादुकन्दायांधात्र्यांक्लीबंतुशाद्वले
शल्यंक्ष्वेडेचमदनेशल्यःसेव्यस्तुपौंड्रके।सेव्यातुहृद्यगन्धायामथसेव्यंरणप्रिये।सौ
म्यासोमासोमराजीसुमनापर्णिनीषुच॥ऋद्धौवृद्धावपिस्त्रीस्यान्नद्योःसोमगन्धिके॥

ऋद्धिवृद्धिरूपकोषः॥शाल्यमिति॰क्ष्वेडोविषं॥मदनोराढः॥क्ष्वेडशंकुशरेशल्यंनाश्वाविन्मदनद्रुम
इतिनानार्थादेरभसः॥सेव्यइति॰पौंड्रकःपुंड्रेक्षु॥पुंड्रेक्षौपुंड्रकःसेव्यःपौंड्रकोतिरसोमधुरिति
वाचस्पतिः॥हृद्यगंधामालती॥रणप्रियंनलदं॥सौम्येति॰सोमासोमवल्ली॥सोमराजीवाकु
ची॥सुमनामालती॥पर्णिनीशालिपर्णी॥ऋद्धिवृद्धीस्वनामख्याते॥सोमगंधिकःकह्लारः॥॥

शिवप्र० ह्रस्वइति० तुंगः केसरी॥ केसरीपूरको तुंगइति ह्रस्वपदीपकः॥ युगं ऋद्धिर्वृद्धिर्युगंतु स्थिराशीसर्वज
७४ नप्रियेति केयदेवः॥ ह्रस्वो ह्रस्वारव्य भेषजे इति विश्वः॥ मुरा गंधकुटी॥ मुरा गंधकुटी स्यात् ह्रस्वा
गंधकुटी कुटिरिति निघंटुः॥ जलकुब्जकः पंकारः॥ गुडत्वचा भृंगं॥ कृष्णजीरं कृष्णा जाजी॥
उग्गारशोधनं ह्रस्वं जरणं कृष्णजीरकमिति धर्मिष्ठः॥ यत्रि॥ अभयेति० हरीतकी शिवा॥

ह्रस्वो तुंगे युगे ह्रस्वा मुरायां जलकुब्जके। ह्रस्वं गुडत्वचायां च कृष्णजीरे तु नस्त्रियाम्॥ य
त्रि अभया तु हरीतक्यां मभयं समगान्धिके। कलोद्यं पद्मबीजेन्दीवरवेणुफलेषु च॥ कैडर्
यः कट्फले द्रंगः काकरञ्जमदनद्रुमे॥ गन्धाढ्या तु सटी गन्धमादनी जलकुब्जके॥ ॥

समगंधिकमुशीरं॥ कलोद्यमिति० पद्मबीजं पयास्यं। इंदीवरं नीलकमलं॥ वेणुफलं वंशयवः॥
कैडर्य इति० कट्फलः सोमवल्कलः॥ द्रंगः कामहानिंवः॥ करंजः करजः॥ मदनद्रुमः राढः॥ गंधाढ्ये ७४
ति० सटी कर्चूरः॥ गंधमादनी सुरा॥ जलकुब्जकः पंकारः॥ पंकारी जलकुब्जकः॥ महाकुमारी गंधाढ्या

तत्पुष्पफलमुत्पलत्वक्षुक्षुपकः॥

गांङ्गेयीति॰मुस्तमंबुधरः॥स्वर्णंहिम॥कसेरुह्वषयर्वा॥मुस्ताकृतिस्वल्पकंदं वृषपर्वा कसेरुक मिति॥चक्षुष्य इति॰कतकोंबुप्रसादनः॥पुंडरीकं स्थलकमलं॥रसांजनं दार्व्वीक्वाथसंभूतं॥ वनकुलत्थ्या॥चक्षुष्या कुंभकारी च कुलाली च कुलाली च कुलत्थिकेति रत्नकोषः॥चांपेय इति॰नागकेसरः॥चांपेयो नागकेसर इति हारावली॥किंजल्कः पुष्पकेसरः॥चंपको हेमपु ष्पकः॥स्वर्णं कनकं॥नादेयीति॰नीरवानीरो जलवेतसः॥नदीकूलप्रियोरम्पः स्यान्निचुलो ज

गाङ्गेयी पुंसि वा मुस्ते क्लीबं स्वर्णकसेरुणोः चक्षुष्यः कतके पुण्डरीयके च रसाञ्जने अ स्त्री स्त्री वनकुलत्थ्ये चाम्पेयो नागकेसरे किञ्जल्के चम्पके पुंसि सुवर्णे पुन्नपुंसके ना देयी नीरवानीरे भूजम्बूनागरङ्गयोः जवायामम्बुपिप्पल्यां जयन्त्यां सैन्धवे द्वयोः ॥

लवेतस इति वैयदेवः॥भूजम्बूः॥काकजंबूर्मेघवर्णो नादेयी विदिशोल्पक इति धन्वंतरिः॥ना देयी स्वल्पजंबूः स्यादिति भावगुणनाममाला॥नागरंगो नारंगः॥नारंगो नार्यंगरत्नकवास नः॥ऐरावतश्च सैव स्यान्नादेयी भूमिजंबुकेति सिंहः॥जवा जया॥अंबुपिप्पली॥जलपिप्पली ॥नादेयी कुटजार्क शिग्रु बृहती त्पत्र नादेयी जलपिप्पलीति रूपनारायणः॥जयंती अग्निमंथभे दः॥जया जयंती तर्कारी नादेयी वैजयंतिकेति केयदेवः॥सैंधवं बरम्॥ ॥

शिवप्र० पयस्येति० दुग्धिका क्षीरावी॥वीरा क्षीरकाकोली॥कांचनक्षीरिणी स्वर्णक्षीरी॥मलयेति० त्रि
७५ वृताभित्रिवृतो द्विविधं मूलं शोणितश्याममेव च॥अरुणत्रिवृद्वारव्यं तु श्यामे श्यामाद्धयं मि
तमिति॥मलयात्रिवृता सर्वधावितिलोचनः॥श्वेतचंदनं हरिचंदनं॥मङ्गल्येति० ग्रंथिलो विल्व
॥अश्वत्थः पिप्पलः॥मसूरः द्विविर्लो शिंविधान्यप्रसिद्धः॥वेश्यायां व्रीहिभेदे च मसूरामसु

पयस्यादुग्धिकावीराकाञ्चनक्षीरिणी सुच मलयात्रिवृताभेदेमलयः श्वेतचन्द
ने मङ्गल्यायन्थिलाश्वत्थमसूरारिष्टवार्षिके स्त्रियांतु शम्प धः पुष्पीमिसिधीरपि
यङ्गुस्तुरोचनाजीवनीमल्लिगंधिकाचागुरुण्यपि विशल्याग्निशिखादन्तीगुडूचीत्रिपु
॥टासुच॥ ॥

रास्त्रियां॥मसूरमसुरौ पुंसि द्वावेतावपि चैतयोरिति रभसः॥
अरिष्टोरक्षावीजः॥वार्षिकं त्रायमाणा॥शमीपविपत्रा॥अधःपुष्पी शंखाह्वा॥मिसिः श
तपुष्पा॥धीरं कुंकुमं॥प्रियंगुः फलिनी फली॥रोचना गोरोचना॥जीवनी जीवा॥मल्लिगंधि
कालागुरु॥मल्लिका पुष्पसौरभानुसारि गंधं जोंगकं॥विशल्येति० अग्निशिखा लांग ७५
ली॥दंती निकुंभः॥गुडूची अमृता॥त्रिपुटा त्रिवृत्त॥ ॥

शङ्खेति॰ वचा षड्ग्रंथा ॥ कंबुमालिनी शंखपुष्पी ॥ दधिक्षीरस्योत्तरा वस्था ॥ शालेयमिति॰ ला
लपली मुसली ॥ चाणक्यमूलकं चणकक्षेत्रसंभूतमूलकं ॥ शैलेयमिति॰ गिरिमृत्तगैरिकं ॥
तालपली मुशली ॥ शैलजं शिलापुष्पं छरीलेति ख्यातं ॥ सिंधुजं सैंधवं ॥ स्त्रीप्रिय इति॰ सह
कारस्य फलं पुंडरीकं ॥ शोभांजनद्रुमः बहलदलः ॥ हिरण्यमिति॰ वराटकः पीतकपर्दः ॥ कांच
नं हेम ॥ पच ॥ अलिप्रियेति॰ जंबूभिदत्र महाजंबूः ॥ नेपाली मल्लिकाभेदः ॥ हलिप्रियः कद

शङ्खातु वचा कम्बुमालिन्योर्द्विनद्योः शालेयं नद्योः स्तालपल्यां चाणक्यमूलके
शैलेयं गिरिमृत्तालपल्यौ शैलजसिन्धुजे स्त्रीप्रियः सहकारस्य फले शोभाञ्जनद्रुमे हिर
ण्यंतु वराटे स्यात्काञ्चने पिचनद्योः यच अलिप्रियातु जम्बूभित्तनेपाल्योर्नो हलिप्रिये
कदम्बे कालेयकुञ्जमोचा मसूरविदलासु च धुलप्रिया प्रतिविषा हस्तिदन्त्योः स्त्रियां मृता जीव
१ नीया जया जीवा काका वीरा सुनागले ॥

म्बः ॥ कलकालेयं॰ कुञ्जो वक्रकंटकः ॥ मोचा
शाल्मली ॥ मसूरविदला त्रिवृत्त ॥ धुलप्रियेति॰ प्रतिविषा अतिविषा ॥ शुक्लकंदापरपर्याया ॥ ह
स्तिदंती निकुंभा ॥ दंती शीघ्रा हस्तिदंती निकुंभा सोपचित्रिका ॥ धुलप्रिया चेति केयदेवः ॥ जीवनी
येति॰ जया हरीतकी ॥ जीवा जीवंती ॥ काका काकोली ॥ वीरा मेदुरा ॥ मेदुरा जीवनीया च धीरावी
राच सा स्मृतेति धन्वंतरिः ॥ काकोली त्रिलोके
ख्याता ॥ गणो जीवनीयाख्यः ॥ जीवनीयो मधु
रके जीवनो मधुरो गणः इति हृदयदीपकः ॥ ॥

शिवप्र० तण्डुलीय इति० शाकभेदः॥ स्त्र्यामेघनादजातिः॥ तंडुलीयो विडंगः स्वल्पमारिषताप्ययोरिति
७६ लोचनः॥ तंडुलीयस्तंडुलेरो मेघनादो घनस्वर इति धन्वन्तरिः॥ विडंगं क्रिमिघ्नं॥ धातुमाक्षिकं ताप्यं
76 ॥ तंडुलीयः शाकभेदे विडंगेत ताप्ययोरिति मेदिनिः॥ त्वगाम्लमिति० केतकी केतकीफलं॥ त्वगा
म्लं तु केतक्याः फले मध्यं च निस्त्वगे॥ इति लोचनः॥ त्वगाम्लं स्याने साधु इति मुकुटः॥ त्वगम्ल

तण्डुलीयः शाकभेदे विडङ्गे धातुमाक्षिके त्वगाम्लं तु केतक्यां मद्ध्यां च त्वगाम्लवत् ध
नञ्जयश्चित्रके स्यादर्जुने ककुभेऽपि च पार्वतीया तु मोदक्यां धातक्यामभया मिदि प्रावृषे
ण्यात्मगुप्तायां कुलत्थे ना हरिप्रिये मुनिप्रियो ब्रह्मवृक्षे नस्यकुण्ड धनुः परे॥ ॥

लेगुल्मे साधुरिति स्वामी॥ धनंजय इति० चित्रकोऽग्निकः॥ अर्जुनककुभः॥ अरुकरो भद्रवात
कः॥ पार्वतीयेति० मोदकी गुडमंजरी॥ धातकी मद्या॥ अभया मित विजया॥ जीवंतिका पूतन
की अमृता विजया भया॥ रोहिणी चेतकी सप्तभेदभिन्ना हरीतकी॥ प्रावृषेण्येति० आत्मगु ७६
प्ता कपिकच्छुः॥ कुलत्थः कुंभकारी॥ हरिप्रियः कदंबः॥ मुनिप्रिय इति० ब्रह्मवृक्षः पिप्पलः॥
नस्यकुंडो वनव्रीहिः॥ धनुः परश्वारः॥ ॥ ॥

रविप्रियेति॰ आदित्यभक्ता सुवर्चला॥ निंबोरविप्रियः॥ मार्कंडेयो भृंगराजः॥ वेधमुख्येति॰ मृगम
दः कस्तूरिकामदः॥ केसरो वकुलः॥ शतवीर्येति॰ शतावरी शतमूली॥ दूर्वा हरिता॥ शुकप्रियेति॰
राजादनः क्षीरी॥ दाडिमी करकः॥ निंबो नियमनः॥ कपीतनः शिरीषः॥ हरिप्रियमिति॰ कालसारं
कालानुसार्यं॥ हरिप्रियं कालसारं तथा कालानुसार्यकं॥ कलंवक इति ख्याता चंदनजातिः॥ क
दंबः प्रावृषेण्यः॥ पद्मम्॥ कालानुसार्यमिति॰ कालीयं सा कालसारं॥ शैलेयं शैलजं॥ शिला

रविप्रियादित्यभक्ता निम्बयोः पुंसि मार्कंडवे वेधमुख्याम्ला मदे वेधमुख्यस्तु केसरे शतवीर्या
शतावर्यां दूर्वायां च शुकप्रिया राजादने च दाडिम्यां निम्बेनातु कपीतने हरिप्रियं कालसा
रे कदम्बे तु हरिप्रियः पद्मम् कालानुसार्यं कालीये शैलेयतगरे पि च सहस्रवीर्या भा
र्गव्या शतावर्यां च योषिति पाल्नाः रेकं श्रीः श्रीनिवेशके विल्वे राजादनलवङ्गयोः॥

पुष्पापरपर्यायं॥ तगरं नतं॥ सहस्रवीर्येति॰ भार्गवी दूर्वा॥ सहस्रवीर्या भार्गव्यो रुहानंतेत्यमरः
॥ शतावरी वकुसुतापीवरीद्वीवरी वरीति निघंटुः॥ पाल्नाः॥ रेकं॥ श्रीरिति॰ श्रीनिवेशकः श्रीवा
सः॥ श्रीवासस्तु दृधिश्याङ्कः श्रीवेष्टः श्रीनिवेशक इति हृदयदीपकः॥ विल्वः श्रीफलः॥ रा
जादनः क्षीरिका॥ लवंगं श्रीफलं॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

श्रिवप्र॰ रष्टि ॥ अस्त्र इति पवालं वंकोवेरं ॥ कुंकुमं रक्तं ॥ अभ्रमिति ॰ मुस्तकमंबुधरः ॥ जांबूनदं सुवर्ण
७७ म् ॥ अभ्रपटलं ॥ अभ्रकं गिरिजामलं इत्यमरः ॥ इंद्र इति ॰ शक्रमहीरुहः इंद्रवृक्षः ॥ फलिज्झको
मरुवकः ॥ उग्रेति ॰ वचा षड्ग्रंथा ॥ क्षुद्धिवोधनष्ठिका ॥ ऐंद्रीति ॰ इंद्रवारुणी गोडुंबा ॥ शेफाली
पुष्पवर्षिणी ॥ सारिवा गोपी ॥ एला त्रुटिः ॥ क्षार इति ॰ पाक्यं विडु गंधि लवणं ॥ विडु गंधि
77 लवणं पाक्यमिति वैद्यदेवः ॥ गुडः फाणितं ॥ काचं त्रिकूटं ॥ काचं पाक्यं त्रिकूटं स्यादिति वै-

रष्टि अस्त्रस्त्रुवालके ह्रीवं कुंकुमेभ्रं तु मुस्तके जाम्बूनदेभ्रपटले पीन्द्रः शक्रमहीरुहे इन्द्र
फलिज्झके पुग्रा वचायां क्षुद्धिवोधने ऐन्द्री स्यादिन्द्रवारुण्यां शेफाली सारिवैलयोः क्षारः
पाक्ये गुडे काचयवाजे पटु भस्मनोः क्षुद्रा चाङ्गेरिका व्याघ्रोः क्षुरो गोक्षुरकक्षुरे क्रोष्ट्री विदारी
॥ लांगल्योः ॥ ॥

द्यदेवः ॥ यवजो यवक्षारः ॥ पटु ॥ सर्वं तु लवणं पाक्यमिति वैद्यदेवः ॥
भस्मराक्षा ॥ क्षुद्रेति ॰ चाङ्गेरिका अम्ललोणिका ॥ व्याघ्री क्षुद्रकंटाली ॥ क्षुर इति ॰ गोक्षुरस्त्रिकं-
टः ॥ इक्षुरः कोकिलाक्षः ॥ कोकिलाक्षेक्षुर क्षुरा इति ॥ क्षुरः कोकिलाक्षश्च गोक्षुर इति विश्वः ७७
॥ क्रोष्ट्रीति ॰ विदारी कृष्णविदारी ॥ क्रोष्ट्री शृगालिका कृष्णविदा चैरी लांगली बुचेतिमे-
दिनी ॥ लांगली कलिकारी ॥ ॥ ॥

क्षौद्रमिति॰ क्षुद्रोऽन्नवं क्षुद्राख्यमक्षिकाकृतं मधु ॥ मक्षिकाः पिङ्गलाः सूक्ष्माः क्षुद्रास्ताभिः कृतं मधु ॥ कपि
लं त्रीतलंऽस्ये विक्षौद्रमित्युच्यते बुधैरिति ॥ जलं पानीयं ॥ खर इति॰ पृथुलं गरका ॥ देवताडो देवदाली ॥
देवताडः द्वयोः स्त्रीक्लीबे त्रिषु ॥ नागद्रुमे खर इति विश्वलोचनः ॥ अजमोदा वस्तमोदा ॥ गरेति॰ गरीति च॰
जीमूतो देवदाली ॥ स्वामी तु गरागरीति समुदितं नाह ॥ जीमूतको देवताडो वृत्तकोशो गरागरीति ॥ उपविषं॰
कृत्रिमं विषं ॥ कृत्रिमं तु विषं घोरं गरश्चोपविषं च तदिति हेमः ॥ अर्कक्षीरं स्नुहीक्षीरं तथैव कलिहा
रिका ॥ करवीरश्च धत्तूरः पञ्च चोपविषाः स्मृता इति भावमिश्रः ॥ गरी खरा या॰ करणे क्लीबे॰ नोपविषे

क्षौद्रं क्षुद्रोद्भवे जले खरो नापृथुले क्लीबं देवताडोऽजमोदयोः गरागरी च जीमूतेन क्लीबं तूपविषे
विषे गुन्द्रैरकानलाभद्रमुस्तेषु गुन्द्रस्तेजने गौरः करञ्जे सिद्धार्थे गौरं तालेऽब्जकेसरे गौ
री तु रजनी पिङ्गाप्रियङ्गुतुलसीषु च चन्द्रः कर्पूरकम्पिल्लजाम्बूनदजलेषु च ॥ ॥

विषे इति मेदिनी ॥ गरं विषे चोपविषे गरः करणरोगयोरिति विश्वलोचनः ॥ विषं काकोलः ॥ गुन्द्र इ
ति॰ एरका गुच्छमूला॰ गुन्द्रैरका गुच्छमूला वानीरः पृथुलः खर इति धर्मशिष्टः ॥ पटेरक इति ख्यातः ॥ स्वतोषि
यं गुः ॥ गुन्द्रा गन्धपत्ली स्यादिति धर्मशिष्टः ॥ भद्रमुस्तकम् ॥ कुरुविन्दो मेघनामा मुस्ता गुन्द्रा तु सा स्मृतेति हेमः ॥
तेजनः शरः ॥ गुन्द्रस्तेजनकः शरस्समरः ॥ गौर इति॰ करञ्जः करजः ॥ सिद्धार्थः श्वेतसर्षपः ॥ तालं हरिता
लं ॥ अब्जकेसरः कमलकिञ्जल्कः ॥ रजनी हरिद्रा ॥ पिङ्गा गोरोचना ॥ प्रियङ्गुर्लता ॥ तुलसी देवदुन्दुभिः ॥
चन्द्र इति॰ कर्पूरो हिमवालुका ॥ कम्पिल्लः कर्कशः ॥ कम्पिल्लः कर्कशश्चन्द्रो रक्ताङ्गो रोचनोऽपि चेति भावमिश्रः ॥

शिवप्र०
७८
78

चित्र इति॰ कृतभुक् पाठीनः॥ दन्ती शीघ्रा॥ ऐन्द्री इन्द्रवारुणी॥ शांबरी द्रवंती॥ चुक्रीति॰ अंयष्ठा चांगेरी चु
क्रिका दंतशठांबष्ठाम्ललोणिके समरः॥ चिंचा चक्रफल॥ चिंचाम्लिका म्लिका वारः सुक्ता चंडा वचु
क्रिकेति केयदेवः॥ चुक्रे सपि॥ अम्लारंतं भिनिका चुक्रा स्तिंतिडीति त्रिंडीति चेति केयदेवः॥ वेतसाख्यं
जंबीरफलसंभूतरसः संशोधितो रवौ॥ मृदमत्रे वेतसाख्यं लोके तच्चूकसंज्ञकमिति॥ अम्लवेतसः
सहस्रवेधी॥ स्यादम्लवेतसः चुक्रः शतभेदी सहस्रभिदिति भावमिश्रः॥ सहस्रवेधी चुक्रोम्लवेतसः

चित्रो कृतभुजि स्त्री तु दन्त्यैन्द्री शाम्बरीषु च चुक्रं पञ्चम्लाश्चिक्रयोर्न
वेतसाख्येऽम्लवेतसे क्लीबं सुक्ते तिन्तिडीके चोरो निट्चरशङ्खयोः॥

शतवेध्यपीत्यमरः॥ सुक्तं॰ यन्मध्वादि शुचौ भांडे सगुडं क्षौद्रकांजिकम्॥ धान्यराशौ त्रिरात्रस्थं
सुक्तं चुक्रं तदुच्यते॥ आदिशब्देन मधूकपुष्पजादिग्रहणं॥ उक्तं च॥ मधूकपुष्पेक्षुरससगुडपीलुफ
लादिभिः। साधितं जातमत्लम्लं सुक्तं चुक्रं च तन्मतमिति सिद्धमंत्रप्रकाशः॥ तिंतिडीकं वृक्षाम्लं॥
चुक्री चांगेरिका यास्या चुक्रं वृक्षाम्लके मतमिति विश्वलोचनः॥ चोर इति॰ निट्चरो गलहास
कः॥ निशाचरो धनहरः कितवो गलहासकः॥ चोरकः शंखितिभावमिश्रः॥ ग्रन्थिपर्णकभेद इति च॥ ७८

छुत्रेति॰मिस्मिः शतपुष्पा॥अतिछत्रः पालघ्नः॥वचातुल्येजलस्लरणेछत्रातिछत्रकश्वसा॥छत्रा
तिछत्रकश्चैवपालघ्नोपिसएवहीतिसिंहः॥कुस्तुंबुरुधनिका॥कुनटीधनिकाछत्राकुस्तुंबुरुवि
तुन्नकमितिभावमिश्रः॥शिलीध्रंकवकं॥तन्त्रीति॰कंदरोहिणीगुडूची॥ओषधोत्तमंओषध
श्रेष्ठं॥तीव्रेत्यति॰तीव्रोत्तमआकारकरभः॥तिक्ताकटुः॥आसुरीराजिका॥दूर्वाभिलगंडदू
र्वा॥गंडालीमत्स्याक्षकामत्स्यगंधेतिसमानार्थाः॥तीव्रालुकटुरोहिण्यांराजिकामंडदूर्वयोरि

छत्रामिसावतिछत्रेकुस्तुंबुरुशिलीध्रयोः तन्त्रीतुकन्दरोहिण्यांतन्त्रंस्यादोषधोत्तमे ती
व्रस्तीव्रोत्तमेतिक्तासुरीदूर्वाभिदिस्त्रियांदारुस्यात्त्रिषुपीतद्रोदेवदारुणिनस्त्रियाम् धारा
वत्सादनीक्षीरकाकोलीपृथुजीरकेसूक्ष्मेलायांहरिद्रायांगंधकुट्यांचयोषिति धीरवीराकु
॥अभिदोधीरंपोष्करस्तयोः॥
तिमेदिनी॥दार्व्विति॰पीतद्रुःकिलिमं॥देवदारुदेवकाष्ठंपु
न्नपुंसकयोर्दारुणीवातुस्थाणुसीधवइतित्रिकांडशेषः॥धारेति॰वत्सादनीगुडूची॥क्षीरका
कोलीक्षीरशुक्ला॥पृथुजीरकःस्थूलजीरकः॥सूक्ष्मेलाद्राविडी॥हरिद्रानिशा॥गंधकुटीमुरी
॥मुरागंधकुटीदैत्येत्येकार्थाः॥धीरेति॰वीराक्षीरकाकोली॥धीरावीरापयस्विनीतिवैयदेवः॥कु
म्भिदशतपत्री॰कंटकप्रावृताधीरानीलाब्जिकुलसंकुलेतिवैयदेवः॥पोष्करंपुष्करमूलं॥स्कंकुं

पुण्ड्रमिति० प्रपौंडरीकं स्थलकमलं॥ गुल्मावद्गनिलोके ख्यातं॥ साधुपुष्पं स्थलपद्मं दृष्टिक्रिसुंदरायक
मितिरभसः॥ प्रपौंडरीकं पौंड्राह्वं पुंडर्यं पुंडरीयकं॥ पुंड्रं सुपुष्पं श्रीपुष्पं चक्षुष्यं सानुमानकमिति केयदेवः।
आजकतुस्तच्चरणो पृथिव्यां स्थालीरविंदं श्रिपममवस्थामिति कालिदासः॥ व्रीहिभित्· पुंड्रः पौंडरीकाभो
व्रीहिरिति सिद्धमंत्रप्रकाशः॥ रक्षुभित्सेव्यः॥ पुंड्रेक्षौ पुंड्रकः सेव्यः पौंड्रको तिरसोमधुरिति वाचस्पतिः॥ अ
तिमुक्तो माधवी॥ पुंडरीकं श्वेतकमलं॥ चररति० तिंदुर्विरला॥ पियालश्चारः॥ अभीरुः शतावरी॥ स्थिर

पुंड्रं प्रपौण्डरीके स्यात् पुण्ड्रो व्रीहीक्षुभेदयोः अतिमुक्ते पुण्डरीके चरस्तिन्दुपियालयोः
चर्य्यभीरौ वरं धीरकुम्भसिन्धुगुडत्वचि वराबन्ध्या चंद्रहासा पोत्री पागा फलत्रिके॥

पत्रत्वात्॥ शतवीर्याो वर्य्यभीरुर्महापुरुषदंतिके निघण्टदीपकः॥ शतमूली वकुसुताभीरुरिंद्रीवरीवरीत्यम
रः॥ अभीरुवीरापनसेत्याद्यभियुक्तप्रयोगाश्च॥ तेनत्वृषातरुणाभीरुभिरित्यसाधुरेवेति प्रांचः धीरं कुंकुमं॥ ॥ फलत्रितकम् ॥
कुंभं गुग्गुलुः॥ कुंभोलूखलकं कुंभं कुंभोलुःखलकं वरमिति वाचस्पतिः॥ सिंधु सैंधवं॥ गुडत्वक् भंगं॥ ७९
वंध्या वंध्याककोटकी॥ चंद्रहासा गुडूची॥ पोत्री वाराहीकंदः॥ पागा अंबष्टा॥ फलत्रिकं हरीतकामल

वीरेति॰ कुलालीवनकुलत्थिका॥ गंभारी श्रीपर्णी॥ कंभारी इतिच॥ क्षीरावीदुग्धिका॥ वारुणीसुरा॥ का
कोलीक्षीरकाकोल्योप्रसिद्धे॥ तामलकीऊरा॥ एला वालुहरिवालुकं॥ रंभाकदली॥ विदारिकायुग्मं
विदारीक्षीरंविदारीच॥ काष्ठोदुंवरिकामलयू:॥ ककुभोऽर्जुनः॥ नतंतगरं॥ शृंगीकर्कटशृंगी॥ कांचिकं
अवंतिसोमं॥ कांचिकं कांजिकं वीरं कुल्माषाभिषुतंतथा॥ अवंतिसोम धान्याम्लमारनालमरंतथा॥ श्रुजं

वीराकुलालीगम्भारीक्षीरावीवारुणीषुच काकोलीक्षीरकाकोलीतामलक्येलवालु
षु रम्भाविदारिकायुग्मकाष्ठोदुम्बरिकासुच वीरस्तुककुभेवीरंनतेशृङ्ग्याचकाञ्जिके
भद्रानन्तारसागोपीकृष्णाहिंस्राम्ललोणिषु सारिण्यांकट्फलेलीवंविश्वाम्बुदमहो
त्पले मुरामहासहायांस्यात् गन्धकुट्यामपिस्त्रियाम्॥

तुंबोदकमितिधन्वंतरिः॥ भद्रेति॰ अनंतायवासकः॥ रसारास्ना॥ गोपीसारिवा॥ कृष्णापिप्पली॥
हिंस्राकंथारी॥ अम्ललोणिश्चांगेरी॥ सारिणीप्रसारिणी॥ कट्फलःसोमवल्कलः॥ विश्वंशुंठी॥
अंबुदोमुस्ता॥ भद्रंस्यान्मंगले हेम्निमुस्तकेकरणांतरे इतिरुद्रः॥ महोत्पलमरविंदं॥ मुरेति॰ म
हासहामाषपर्णी॥ गंधकुटीकुटिः॥ ॥

शिवप्र॰ वज्र इति॰ सिंहुंडः सीहुंडः ॥ वज्रद्रुमः सिहुंडोपीति रभसः ॥ अथ सीहुंडो वज्रः स्नुक्स्त्री स्नुही गुडे
८० त्समरेस्वामिपादाः ॥ शिवमामलकं ॥ हीरकः कुलिशं ॥ वज्रं त्रिकोणषट्कोणभास्वत्तीक्ष्णं यथार्थ
80 कमिति ॥ वालकं वारि ॥ गुडूची छिन्नरुहा ॥ व्याघ्र इति॰ रक्तैरंडः प्रसिद्धः ॥ करंजः षड्ग्रंथः ॥ निदि
ग्धिका कंटकारी ॥ वेरमिति॰ वंगं वातिंगणः ॥ कुंकुमं धीरं ॥ शक्र इति॰ अर्जुनः ककुभः ॥ कुटजः कौ

वज्रः सिंहुंडे वज्रं तु त्रि वहीरकवालके ॥ वज्रा गुडूच्यां व्याघ्रस्तु रक्तैरण्डकरञ्जयोः ॥
व्याघ्री निदिग्धिकायां च वेरं वङ्गेपि कुङ्कुमे । शक्रोऽर्जुने च कुटजे शिग्रुः शोभाञ्ज
ने पुमान् ॥ शाकमात्रे च शीघ्रा तु दन्त्यां शीघ्रं घनच्छदे ॥ सेव्ये शुभ्रस्तु सुमने
शुभ्रा वंश्या हि छत्रयोः ॥ शुभ्रं वरेऽभ्रके ॥ ॥

टी ॥ कौटजः कुटजः कौटीति चंद्रः ॥ शिग्रुरिति॰ शोभांजनः सुभंजनः ॥ शाकमात्रं मूलकादि दशधोक्तं ।
शीघ्रेति॰ दंती निकुंभः ॥ घनच्छदः शोभांजनः ॥ सेव्यमुशीरं ॥ शुभ्र इति॰ सुमनो गोधूमः ॥ वंश्या वे
णवी ॥ वैणवी वंशजा वंश्या वांशी वंशविवर्द्धनी ॥ वंशाक्षीरी शुभा शुभ्रा रोचना वंशरोचनेति नि ८०
घंटुः ॥ अहिछत्रा सितोपला ॥ अन्याश्वेता त्वहिछत्रा सिकता च सितोपलेति वैद्यदेवः ॥ वरं सैंध
वं ॥ अभ्रकं गिरिजं ॥

सारइति॰लोहं अयः॥दाडिंबो दाडिमी॥याज्ञिकः खदिरः॥स्थिरेति॰कलशी शालिपर्णी॥अंशुमती पृ

श्निपर्णी॥सूर्य्यपर्णीद्वयं॥माषपर्णीमुद्गपर्ण्यौ॥धवोभरोद्वहः॥हिंस्रेति॰काकादनी कंथारिका॥चिरा

युः शाल्मली॥बृहती कंटकारिका॥कृष्णसारा मंडलपत्रिका॥पिशाची भूतजटा॥आटरूषको वा

सा॥रत्रि॥अमरेति॰नीलदूर्वा हरिताली॥वत्सादनी गुडूची॥गुडा स्नुही॥अस्थिसंहारो ह्यस्थिशृंखला॥वज्रवल्ल्यस्थिसंहारो वज्राङ्गी प्रोक्ता तथामरेति हृदयदीपकः॥अंबरमिति॰सुगंधिकं।सिंधुसुर

सारो लोह दाडिम्ब याज्ञिके स्थिरा कलश्यंशुमत्योः सूर्यपर्णीद्वयेपि च धवे तु पुंसि हिंस्रा

तु काकादन्यां चिरायुषि बृहत्यां कृष्णसारायां पिशाच्यामाटरूषके रत्रि अमरा नीलदूर्वा

यां वत्सादन्यामथामरः गुडायामस्थिसंहारे ष्वम्बरं तु सुगन्धिके कर्प्पासिष्वगुरुर्नीवे

शिंशुपायां च जोंगके करीरो गूढपत्रे च नस्त्री वंशस्य कन्दले कच्छुरा शुकशिम्बायां शा

टीदुस्पर्शयोरपि॥

भी शाकद्रिति गांधिकः॥महामत्स्यगिलितोद्गित सिंधुसरधाकृतमधुछत्र

शेषमिति सो यात्रिकाः॥कर्प्पासो वपनी॥अगुर्विति॰शिंशुपा मंडलपत्रिका।जोंगकं लोहं॥वंशाका गु

रु राजार्हं लोहं कृमिजं जोंगकमित्यमरः॥अगुरु नीवे शिंशपायां जोंगके लघुनि त्रिष्विति रुद्रः॥क

रीर इति॰गूढपत्रो ग्रंथिलः वंशकंदलो वंशांकुरः॥कंदलः कलहे पुंश्च नवांकुरकपालयोरिति विश्व

लोचनः॥कच्छुरेति॰शुकशिंबा शूकशिंबिः॥शाटी कर्चूरः॥दुस्पर्शो यवासकः॥ ॥ ॥

कर्चूर इति॰ गंधमूलोऽद्रविडः॥ गंधमूलो वेधमुख्यो कर्चूरोऽद्राविडः शठीति निघंटुः॥ नटमंडनं हरिताले
॥ कवरीति॰ वर्वरा कवरी तुंगी खरपुष्पा जगंधि केसमरः॥ वर्वरीति पाठभेद इति स्वामी॥ ववरीति लो
के ख्याता॥ पृथ्वी स्थूलजीरकः॥ कलिद्रुरिति॰ श्रीनिवासः श्रीवेष्टः॥ भूतावासः कलिद्रुमः॥ काश्मी
रमिति॰ कुंकुमं धीरं॥ पुण्यसागरः पोष्करं॥ कुमारीति॰ तरणी शतपत्री॥ वंध्या वंध्याकर्कोटकी॥ वन
माल्यं॥ वनमालिका॥ नेपालीस्यपरपर्यायो मल्लिकाभेदः सहा घृतकुमारी श्वेतस्पंदा श्वेतापराजिता।

कर्चूरो गन्धमूले स्यात्कर्चूरं नटमण्डने कवरी वर्वरा पृथ्वोः कलिद्रुः श्रीनिवासके भूतावासे
च काश्मीरं कुङ्कुमे पुण्यसागरे कुमारी तरणी वन्ध्या वनमाल्य सहा सु च श्वेतस्पन्दा म
हाजम्ब्वोः कुमारो वरुणे नरि कुन्नरा मदनीयायां पाटलायां च केसरः किञ्जल्के स्त्री
पुमान्तुङ्गे मुकुरे पुष्पकेसरे सूपधूपनके क्लीवं॥

॥ महाजम्बूः राजजंम्बूः॥ वरुणो भ्रमर
वंधुः॥ चंदारलेपप्रसिद्धः॥ कुन्नरेति॰ मदनीया धातकी॥ पाटला ताम्रपुष्पी॥ केसर इति॰ किञ्जल्को
ऽत्र केसरः॥ केसरमस्त्री हि केसरयोरिति हृदयदीपकः॥ तुंगो नागकेसरः॥ मुकुरो वकुलः॥ मुकुरः स्या
न्मकुरवद्दर्पणे वकुलद्रुमे॥ कुलालदंड इति मेदिनी॥ उरुपत्रः कोलफलो महीरुहो मद्यदोहदो वकु
लः॥ मितमणुचक्राकारमघामोदं सितं कुसुममिति॥ पुष्पकेसरः पुष्पमात्रकेसरः॥ सूपधूपनं हिंगु
॥ केसरं हिंगुनि क्लीवं किंजल्के नस्त्रियामिति मेदिनी॥ सवित्र किसलय केसरसभा इस्सूक्ष्म विवेका ८१

खपुर इति॰ पूगउद्वेगः॥ मुस्ता मुस्तकम्॥ खर्जूर इति॰ सिंदी दुरारोहा॥ तालपत्री मुशली॥ हिरण्यपुष्पी
खर्जूरी मुशलीतालपत्रिकेति धन्वन्तरिः॥ खदिरेति॰ शाकभेदोत्र व्यक्तास्तु॥ नमस्कारी गंडकाली स
मंगा खदिरेत्यपीत्यमरः॥ लोचनस्तु खदिरीत्याह॥ खदिरी शाकभेदस्यात् खदिरो दन्तधावन इति॥
दन्तधावनो बालपत्रः॥ गण्डीरीति॰ मत्स्यगंधा मत्स्याक्षकः॥ गांडर इति ख्यातं तत्तृणं॥ शाकभिद्वत्र स

खपुरः पूगमुस्तयोः खर्जूरस्तु द्वयोः सिन्धीतालपत्र्योस्तु साक्षियाम् खदिरा शाकभेदे स्या
त्खदिरो दन्तधावने। गण्डीरी मत्स्यगन्धायां शाकभिद्वज्रयोः पुमान् जम्बीरः प्रस्थपुष्पे च
जम्भले शाकभिद्यपि॥

१९ समष्ठिला॥ गंडीरो नाम समष्ठिलेत्यमरः॥ गांडरदुवी इति ख्यातस्यानू
पजशाकस्येति रामाश्रमाः गंडीरिकारक्त दंडावेत साकारपत्रोऽभ्यन्तती क्षणाकुल्यादिसमीपे जायते इ
ति रूपनारायणः॥ वज्र स्नुही॥ स्नुही वज्रो महावृक्षो गंडीरः स्नुकू सुधा गुडः॥ जम्बीर इति॰ प्रस्थ
पुष्पः फणिज्झकः॥ जंभलो जंभः॥ शाकभिदत्र जंबीरः॥ जंबीरसदृशः किंचित्तीक्ष्णः शाक इति हेमा
द्रिः॥ जंबीरो हरितशाकमुजरापथे प्रसिद्धमिति॥ जंबीरगंधि हरितं यदम्लकटुकं रसे॥ शाकं जं
बीरमित्युक्तं जंभलं चोत्तरापथ इति सिद्धमंत्रप्रकाशः॥ ॥

त्वक्पत्रीति॰ हिंगुपत्री वाष्पिका॥ गुडत्वगुत्कटं च त्वचं तनुकं स्वर्णभूमिकमिति। त्वक्सार इति॰ शाणा घंटा
रवा। वंशो वेणुः॥ तुवरीति॰ अन्नमिदन्न आढकी॥ मृत्स्नाति सौराष्ट्री॥ तूवरी च॰ वार्षिकी मद्धिका॥ तूव
र्याढकी। कच्छुराशटीति वा पालितः। द्रुमभेदः। पत्रैस्तु केसराकारैः॰ कस्माय सहशेः फलेः॥ वृक्षस्तुव
रको नाम पश्चिमार्णवतीरज इति॥ नागरमिति॰ विश्वं शुंठी॥ मुस्तमंबुदः॥ देवी वंध्याककोटिकी॥ युगं
धरस्तु कर्कोटः सोऽपि क्षुद्रफलो यदि॥ नदाकर्कोटकी देवी नागरी विषकंटकी॥ वंध्यापीति सिंहः॥ निर्ज

त्वक्पत्री हिङ्गुपत्र्यां च त्वक्पत्रं तु गुडत्वचि त्वक्सारस्तु शणे वंशे तुवर्यन्नमदो भिदि द्रुभेदे
नागरं विश्वे मुस्तं देव्यां तु नागरी निर्जरा तालपर्ण्यां च वत्सादन्यां शिवा फले पवित्रः खदि
रे दर्भे पत्तूरो लोहमारके रक्तकाष्ठे पि पङ्कारः शैवले पुं जलकुब्जके पापी रो भक्तसिक्थ्यस्या
लदम्भस्य च केसरे पीतद्रुः पुंसि गोराभपीतचन्दनयोरपि।

जरेति॰ तालपर्णी मुसली॥
वत्सादनी गुडूची॥ शिवा फलं हरीतकी॥ पवित्र इति॰ खदिरो दंतधावनः॥ दर्भः कुशः॥ पत्तूर इति॰ लो
हमारकः॥ लिंचे पत्तूरो लोहमारक इति सिंहः॥ छिरहट्ट इति लोके॥ रक्तकाष्ठं सरक्तकं पत्तूरप
त्रागं चेति धन्वंतरिः॥ पंकार इति॰ शैवलः॥ शीवलः॥ जलकुब्जको कच्छकंटकः॥ पापीर इ ८२
ति॰ भक्तसिक्थः जलस्थततंडुलानां मंडरहितो भागः॥ कदंबकेसरः प्रसिद्धः॥ पीतद्रुरिति॰
गोराभचंदनं गोरं वर्णं सुगंधि चंदनं पीतचंदनं दारुहरिद्रा॥ ॥

पुष्करमिति॰पुण्यसागरः पुष्करमूलं॥पौष्करं पुष्करजटीकाश्मीरं पुण्यसागर इति केयदेवः॥उक्तं पुष्करमूलं
तु पौष्करं पुष्करं च तत्॥पद्मपत्रं च काश्मीरं कुष्ठभेदमिदं जगुरिति॥पंकजं कमलं॥पौष्करमिति॰पद्मवीजं
पद्माक्षमंदाकिनी पुष्करबीजमाला॥मिति कुमारः॥पुष्करस्य मूलं पुण्यसागरः॥भस्सर इति॰स्वर्जिक्षा
रः सुवर्चिका॥गडुरख्यलवणं॰शाकंभरीदेशोद्भवं सांभरापरपर्यायं॥मसूरेति॰मसुराच॰त्वचसु
षेण॥धान्यविशेषः भंगल्यः॥एतावपि द्वौ मसूरमसुरौ॥एतयोः त्रिवृद्धान्यविशेषयोः॥वेसवारः परि
सरो मसूरः कुसुमासन इति सभेदान्मध्यदन्ताः॥मधुरमिति॰विषंकाकोलः॥द्राक्षामृद्धिका॥मिश्रेया

पुष्करं नद्वयोः पुण्यसागरे पङ्कजेपि च पौष्करं पद्मवीजे स्यान्मूले पुष्करकस्य च भस्सरः स्वर्जिकाक्षा
रे गंडुरख्यलवणेपि च मसूरा मसुरा चापि त्रिवृद्धान्यविशेषयोः मसूरामसुरौ पुंसि द्वावेतावपि चैत
योः मधुरं विषे स्त्रियां द्राक्षा मिश्रेयामागधीषु च महाशतावरीमेदामधूलीयष्टिकास्वपि मधुवल्ल्या
ऽऽमथो पुंसि जीवन्नचिरजीविनोः॥ ॥

शतपुष्पा॥शालेयः स्याच्छीतशिवश्छत्रा मधुरिका मि
शिरित्यमरः॥मागधी वन शतपुष्पा॰सेतिका योनिश्शूलघ्नी मधुरा मागधी षडेति केयदेवः॥महाशता
वरी॰महापुरुषदंतिका॥सहस्रवीर्या मधुरा महापुरुषदंतिकेति केयदेवः॥मेदा मणिच्छिद्रा॥मणिच्छि
द्रा देवमणिर्मधुरा च सुच्छिद्रिकेति केयदेवः॥मधूली गोधूमभेदः॥यष्टिका मधुयष्टी॥मधुवल्ली मधु
कर्कटी॥मधुरा मातुलुंगजातिः॥अन्या स्वादुर्मधुकर्कटी॥घंटालिका स्वादुलुंगी मधुरा मधुकर्कटीति के
यदेवः॥जीवंतो रक्तनालः स्याच्छ्याम पत्रः मणालकः॥शाकवीरः सुमधुरो वास्तुको मार्षकः स्मृतः॥चिरजी
वी जीवकः॥स्याद्कूस्वांगो मधुरको मधुरश्चिरजीवक इति
रभसः॥जीवकः कूर्चकाकार ऋषभो वृषशृंगवदिति भा
वमिश्रः॥ ॥

मंदार इति० पारिभद्रेनिंबतरुर्मंदारः पारिजातक इति ॥ फरहद इति लोके ख्यातः ॥ वकुल वचनान्मंदेरा
रुश्च मंदारुः पारिभद्रेच मंदारः पारिजातक इति शब्दार्णवः ॥ अर्कपर्णोर्कः ॥ देवमहीरुहः । पंचैतेदे
वतरवो मंदारः । पारिजातकः ॥ संतानः कल्पवृक्षश्च पुंसि वा हरिचंदनमित्यमरः ॥ रुधिरेति० रो
चना गोरोचना ॥ कुंकुमं धीरं ॥ अस्रकूरक्तचंदनं ॥ वदर इति० कुंतली चंचुसदृशा दीर्घपत्रा ॥ ति
लपर्ण्याख्य शाकः तिलपर्णी वदरको वर्वरश्च प्रकीर्तितः ॥ कोलि घेटि ॥ कर्पास्याछादन फला ॥

मंदार पारिभद्रे र्कपर्णे देवमहीरुहे रुधिरा रोचनायां च रुधिरं कुंकुमे सृजि वदरः कुन्तली शाकाति
लपर्ण्याख्य शाकयोः वदरी कोलिक र्पास्योर्वदरं तु फलेतयोः वदरात्तु लवदरी विष्णुक्रान्ता रसासु च
वर्वरस्त्वजगन्धायां फञ्जी वोलेतु वर्वरम् वल्लूरा त्रिषु संशुष्कमांस शूकर मांसयोः ॥ ॥

तयोः कोलिकर्पास्योः । तूलं प्रसिद्धं ॥ वदरी वाराहीकंदः ॥ वाराहीकंद संज्ञस्तु पश्चिमे गृष्टि संज्ञ
कः ॥ वाराही वदरी घृष्टिर्वदरे त्वपि सा स्मृतेति ॥ विष्णुक्रांता पराजिता ॥ रसा रास्ना ॥ वर्वर इति
० अजगंधा वस्तगंधा फंजी ब्राह्मणयष्टिका भार्गीति समानार्थाः ॥ वोलो गंधरसः ॥ वल्लूरेति
० संशुष्कमांसं प्रसिद्धं ॥ सूकरः पोत्री ॥ ॥ ॥ ॥ ॥ ॥ ॥

वशिरमिति० सिंधुलवणं अक्षिलवणं॥ आघाटः रक्तापामार्गः॥ गजाह्वा श्रेयसी॥ वानीरइ
ति० कपी चूतकपीतनः पिप्पलभेदः॥ रथो वंजुलः॥ अथ वेतसो रथाभ्रपुष्पविदुलशीतवानीर
वंजुला इत्यमरः॥ वानीरो वारिसंविधे कुटजा भद्रलः सुमं॥ अरुणमिसुक्तः॥ विदारीति० इक्षुगंधा
विदारीकंदः॥ काहलाकारलोहितपुष्पः सप्तविधः। दीर्घकंदो वक्रक्षीरः॥ हस्तिपादकोत्पक्षीरइति

वशिरं सिंधुलवणे नात्वाघाटं गजाह्वयो; वानीरः कपि चूते रथे विदारी क्षुगन्धायाम् सौ
म्यायां च विचित्रो वरचित्रे चित्रशोके च शम्वरी स्यादाखुकर्ण्यां शम्वरः वालके जले शाव
रीशुकशिम्वायां शावरः शावरोऽम्बवे शिलीघ्रं कवके ल्लीवं कदल्याः कुसुमेऽपि च शिशिरं चन्दने चन्द्रे

उद्भवणः॥ सौम्या शालपर्णी॥ विचित्र इति० वरचित्रस्तिलकः॥ चित्रशोकः अशोकः॥ शंवरीति० आखु
कर्णी दन्ती॥ वालकं ह्रीवेरं॥ जलं पानीयं॥ शावरीति० शुकशिंवा शूकशिंवि॥ शावरोऽम्बवं श्वेतरोध्रः॥ श्वे
तरोध्रः शावरो क्षिभैषज्यं शावरोऽम्बवमिति हृदयदीपकः॥ दंत्यादिरपि॥ सावरो रव्यापराधे पि रोध्रेपायेव
पव्यत इति दंत्यादावजयः॥ शिलीध्रमिति० कवकं छत्राकः॥ कदल्याः कुसुमं रंभासुमं॥ शिशिरमि

ति० चंदनं श्वेतं सुगंधिचंदनं॥ चंद्रं हिमवालुका॥

संगररति ० हलाहलः विषं ॥ हालाहलं हालहलं च वदंत्यपि हलाहलमिति शमीफलं संगररसे
व ख्यातं लोके ॥ सामुद्रमिति ० लवणाब्धिजे सामुद्रलवणं ॥ सामुद्रकं सागरकं वटुकलवणा
ब्धिजमिति कैयदेवः ॥ अंबरं सुगंधिकं ॥ अट्टविलासिनी व्याघ्रनखं ॥ सिंदूरमिति ० नागसंभवं ·
रक्तरेणुर्नागगर्भं श्रीमत् शृंगारभूषणं गंधर्वभूषणं रक्तं सिंदूरं नागसंभवमिति कैयदेवः ॥ रोचना

सङ्गररस्तु हलाहले शमीफले तु रुक्मीवंस्यात् सामुद्रं लवणाब्धिजे अम्बरे दविलासिन्यां सिन्दू
रं नागसंभवे सिन्दूरी रोचना रक्तबीजिका धातकीषु च सौवीरं काञ्जिके स्रोतोऽञ्जने च वदरी
फले हरिद्रा स्यान्निशादा व्योः पुंसि धूलीकदम्बके हिण्डीरं दाडिमे नाब्धिकफे वंगे तु नस्त्रि

मंगल्य द्रव्यं · रोचना इति विख्यातं ॥ रक्तबीजिका सिंदूरी रक्तबीजा च रक्तपुष्पा सुकोमलेति भावमिश्र
:॥ धातकी सीधुपुष्पी ॥ सौवीरमिति ० काञ्जिकं अवंति सोमं ॥ स्रोतोंजनं सौवीरांजनं ॥ वदरीफ
लं वदरं ॥ हरिद्रेति ० निशा पीना ॥ दार्वी दारुहरिद्रा ॥ धूलीकदंबो वसंतपुष्पितः ॥ हिण्डीरमि
ति ० दाडिमं करकः ॥ अब्धिकफो डिण्डीरः ॥ वंगं चान्नं कुः ॥ ॥ ॥ ॥

रच॥इन्दीवरमिति॰कुवलयंनीलोत्पलं॥नीलोत्पलंकुवलयंनीलाब्जमसितोत्पलं॥इंदीवरंचकाकोलोडुंरा॥कज्जलंकाककुम्भल्लमितिकेयदेवः॥व्याडिस्तुइंदीवारमप्याह॥वरीशतावरी॥शतमूलीवहुसुताभीरुरिंदीवरीवरीत्यमरः॥द्रोणीदीर्घवृंता॥करंभाकर्कशाद्रोणीदीर्घवृंतोत्तरेमोणी॥इंदीवरीसुगमफलासुलोणीनीलिकाचसेतिकेयदेवः॥उदुम्बरइति॰हेमदुग्धः॥उदुंबरोहेमदुग्धोहरिताक्षोचसुक्रुमइतिकेयदेवः॥सर्वधातुस्ताम्रं॥उदुंबरंरक्तधातुःकनीयःसर्वधातुकमितिकेयदेवः॥उपचित्रेति॰

रच इन्दीवरंकुवलयेवरीद्रोण्योस्तुयोषिति उदुम्बरोहेमदुग्धेसर्वधातौतुनद्वयोः उपचित्रासुतश्रेण्योंद्राक्षायण्यांचयोषिति करभरोरलौस्त्रीतुसरणीमत्स्यपित्तयोः कलिम्बिकायांगोलायांचवर्षाभूभूर्वयोरपि॥

उपसुतश्रेणीद्रवन्ती॥द्राक्षायणीदंती॥करंभरइति॰अरलुः॥करंभरोभूतवृक्षोभल्लूकश्चिंडुकोरलुरितिकेयदेवः॥सरणीप्रसारणी॥प्रसारणीस्यात्करंभरासरणीतिहृदयदीपकः॥मत्स्यपित्ताकटुी॥करंभराप्रसारण्योरोहिण्यांचगजयोषितीतिमेदिनी॥कलंविका॥कलंवादस्याकलंवोनाडिकाकारःसुषिरोवक्रतोयजइतिगोलाकुनटी॥वर्षाभूःपुनर्नवा॥मूर्वामधुरसा॥ ॥

कलिकारीति० विन्न्यात्यागर्भपातिनी॥ करंजकः करजः॥ कर्णिकार इति० परिव्याधः काष्ठचंपक इतिरामः। व्याधिघातो दीर्घफलः॥ गणेरुः कनकपुष्पिका॥ कर्णपूर इति० वीतशोकोऽशोकः॥ नीलोत्पलमसितोत्पलं। कपीतनः पार्श्वपिप्पलः॥ कादम्बरीति० वारुणी श्वेता। पुनर्नवा शालिपिष्टेः कृताश्वेता च वारुणीति निघंटुः॥ दध्यग्रं दधिसरः॥ कादंबरं तु दध्यग्रे मद्यभेदे पिनद्धयोरितिमे

कलिकारी विशल्यायां कलिकारः करञ्जके। कर्णिकारः परिव्याध व्याधिघात गणेरुके कर्णपूरो वीतशोकनीलोत्पल कपीतने कादम्बरी तु वारुण्यां क्लीवं दध्यग्रमद्ययोः कृष्ण सारो वालपत्रे शिंशपायां तु योषिति दीर्घनख्यां च भण्डीरेन क्लीवं वज्रकण्टके घनसा रोऽम्बुकर्पूरे दाक्षिण्यावर्त्त पारदे।

दिनीः॥ मेदिनी तु दध्यग्रे पुंस्याह॥ कादंबरस्तु दध्यग्रे मद्यभेदे नपुंसकमिति॥ दध्युत्तरोदाधेरग्रेहो दध्यग्रः कट्वुरसर इति केयदेवः॥ मद्यमत्र हाला॥ कृष्ण सार इति० वालपत्रः खदिरः॥ शिंशपा मंडलपत्रिका॥ दीर्घनखी कालस्कंधा भंडीरः शिरीषः॥ वज्रकंटकः स्नुही॥ घनसार इति० आपः जलं॥ अप्शब्दो बहुवचनांतः स्त्रीलिंगः॥ कर्पूरो हिमवालुका॥ दक्षिणावर्त्त पारदः॥ पारदस्याग्निस्थायित्वे सति दक्षिणावर्त्तेनैव भ्रमिरेतितद्विदः॥ ॥ ८५

तुण्डिकेरीति॰ पिचुस्तूलः॥ विंबीरक्तफला॥ तुंडिकेरी रक्तफला विंविकापीलुपर्ण्यपीत्यमरः॥ तोय
धरइति॰ सुनिषण्णश्चतुर्दृलः॥ मुस्तामेघः॥ दीर्घपत्रइति॰ मधूलकः॥ मधूकोन्योमधूलस्तुज
लजोदीर्घपत्रकइतिस्वामि पाठः॥ वञ्जुलंतरोवीरतरः॥ वञ्जुलंतरोजगतिवीरतरः प्रसिद्धः श्वेतासि
तारुणविलोहितनीलपुष्पः॥ स्याज्जातितुल्यकुसुमः शमिसूक्ष्मपत्रः स्यात्कंटकीविजलदेश

तुण्डिकेरीपिचौविम्बामपितोयधरः पुमान् सुनिषण्णेचमुस्तायां
दीर्घपत्रोमधूलके वञ्जुलंतरेचलमुनेचवर्षाभूर्दीर्घवृक्षयोः कुम्भ
योनावभ्रपुष्पेफलाण्डेगुडदारुणि॥ ॥

ज एषवृक्षइति॥ वरवेलइतिलोकोइतिभावमिश्रः॥ दीर्घमूलः दीर्घपत्रः रहद्यातरसेकार्थाः॥
लसुनोरसोनः॥ वर्षाभूः क्षुद्रवर्षाभूः॥ वृश्चीवः क्षुद्रवर्षाभूर्दीर्घपत्रः कठिल्लकइतिधन्वंतरिः॥ दी
र्घवृक्षोवंशः॥ कुंभयोनिरगस्त्यः॥ अभ्रपुष्पोवेतसः॥ अभ्रपुष्पश्चविदुलोरथः शीतश्चवेतसइतिभा
वमिश्रः॥ पत्राखुमेष्टकर्णः॥ गुडदारुरिक्षुः॥

पयोधरइति० नालिकेरस्त्रिनेत्रः॥ वा० प्रार्थ्यतेमदनविकलयापुवत्याभाति ग्रपुत्र कमपेतिकथंवता
युः॥ ह्यानादरोभवतिकेनविराजतेङ्गवाह्यास्थि किंफलमुदाहरनालिकेरमितिविदग्धमुखमंडनं ना०
अलिके०अरंइतिछेदः॥ प्रतिलोमेतुरंके०अलिनाइतिछेदः॥ त्रियांचक्रीडांमिथोविदधतेनवनालिके
र्यइत्यमरचंद्रः॥ नारिकेली इति च॥ यत्रनगरे०नारिकेलीघटितमूलवंछत्त्वविपिनराजयइवराजवराज
यइतिप्रभावतीहरणचर्ये घांविठ्ठलकृष्णभट्टाः॥ नालिकेरइदंतोपितथादीर्घद्वितीयवाणितिद्विरूप

पयोधरोनालिकेरेमुस्तायांचकेसेरुणि पारिभद्रः पारिजातेतिक्तकेदेवदारुणि
श्रीहरसांत्रुःशरपुंखेवनतिक्तकयोःपुमान् पीतदारु॰ पीतकाष्ठेपीतायांदेवदारुणि

कोषः॥ मुस्ताब्दः॥ कसेरुमुस्ताकृतिलोमशोमधुरोजलकंदः॥ पारिभद्रइति० पारिजातःपारिभद्रो
निंबतरुर्मंदारःपारिजातकइतिभावमिश्रः॥ फरहदइतिलोके॥ तिक्तकोनिंबः॥ अरिष्टःपारिभ
द्रःश्चहिंगुनिर्यासइत्यपीतिभावमिश्रः॥ देवदारुदेवकाष्टम्॥ श्रीहरसांत्रुरिति० शरपुंखः श्री
हरसांत्रुनीलीवृक्षाभगुल्मकइतिभावमिश्रः॥ वनतिक्तोरोहितः॥ श्रीहरसांत्रुर्वनतिक्तश्चरो ८६
हितइतिमाधवः॥ पीतदारुरिति० पीतकाष्ठंदारुहरिद्रा॥ पीताहरिद्रा॥ देवदारुदेवकाष्ठम्॥

मणिछिद्रेति॰मेदाभेदः महामेदा।ऋषभोवृषभः॥रक्तसार इति॰पत्तंगंपट्टरंजनं॥खदिरोदंतधावनः॥रक्तचंदनं शोणचंदनं॥वाजीकरीति॰वाजिगंधा अश्वगंधा॥विदारी विदारीकंदः॥आमलकीधात्री॥शतपत्रीति॰भर्वं॰महाकुमारीगंधाढ्या तत्पुष्पंभवमुच्यतइति।।वरी शतावरी।सरोरुहंकमलं॥श्रृंगवेरीति॰दार्विपत्री गोजिह्विका।।कटुकंदमार्द्रकं॥स्मृतःसुरतरुरिति॰देवदारुदेवका

मणिछिद्रातुमेदायाभेदेपिसृषभेपिच रक्तसारस्तुपत्तङ्गे खदिरे रक्तचन्दने वाजीकरी
वाजिगन्धाविदार्य्यामलकीषुच शतपत्रीभवेवर्य्यांशतपत्रेसरोरुहे श्रृङ्गवेरीवार्द्वि
पत्र्यांकटुकन्देतुनद्व्योः स्मृतःसुरद्रुर्द्देवदारुण्यपिविकङ्कते सुकुमारातुरम्भायांम
नोज्ञायांशुकप्रिये पुंसिपुंड्राभिधानेक्षौलीवंसीकेसे।सिकथयोः॥ ॥ ॥

ष्ठ।विकंकतः स्रुवतरुः॥वृक्षकंटकारिकापरपर्य्यायः॥सुकुमारेति॰रंभाकदली॥कदलीसुकुमारचरंभाभानुफला मतेतिधन्वंतरिः। मनोज्ञावंध्याककोटकी॥वंध्याककोटकीदेवमनोज्ञासुकुमारिकेतिधन्वंतरिः।शुकप्रियःशिरीषः॥पुंड्राभिधानेक्षुः इक्षुश्रेष्टःप्रसिद्धः॥सीसकंनागाभिधानं॥सिक्थंमयणं॥ ॥

सुप्रसरेति ० प्रसारिणी सरणी ॥ हरिता दूर्वा ॥ सूचिपत्रेति ० केतकीकरपत्रपत्रा ॥ शितिवारकः क्षेत्रभूषा ॥ एयं
तमालपत्रमति ० तापिच्छपत्रं ० कालस्कंधस्तमालः स्यात्तापिच्छोपीत्यमरः ॥ श्रीमान्तिलकः ॥ पत्रकं त्रिगंधां
तःपाति ० नच्च नागकेसरपत्राणीति ॥ तमालपत्रकं पत्रं नामसंवरस्त्रमंशुकमितिके यदेवः ॥ तमालपत्रकं पत्रं
तमालच्छदनं दलमिति धर्मिष्ठः ॥ तालीसपत्रमिति ० भूम्यामलकी भूधात्री ॥ तालीसपत्रं तालीसमिति हृदयदी
पकः ॥ स्याद्राजबदरमिति ० रक्तामलकं ॥ प्राचीनामलकं प्राचीनागरी चापि रक्तकमिति ॥ लवणं पटु ॥ सर्वतोभद्र ॥

सुप्रसराप्रसारिण्यां हरितायामपि स्त्रियां । सूचिपत्रा च केतक्यां स्त्रियां नाशितिवारके स्य
म् तमालपत्रं तापिच्छपत्रे श्रीमति पत्रके तालीसपत्रं भूम्यामलकी तालीसयोर्मतम् स्या
द्राजबदरं रक्तामलके लवणेपि च सर्वतोभद्र उक्तो नानिम्बमुद्यांलुयोषिति रषट् रसाय
नवराधात्री जीवन्ती त्रिफलासु च पुनर्नवाकाकमाच्योः क्षीवं पयसि सर्पिषि राज्ञाः ॥

इति ० निंबः पिचुमंदः ॥ मुद्गीका श्मरी ॥ श्रीपर्णी सर्वतोभद्रा काश्मीरी काश्मरी मुद्गीति केयदेवः ॥ रषट् ॥
रसायनवरेति ० धात्री आमलकी ॥ जीवंती स्वर्णनालिका ॥ त्रिफला फलश्रेष्ठा ॥ फलोत्तमा फलश्रेष्ठा त्रि
फला च फलत्रयं ॥ वरा रसायनवरा सा च धात्री विभीतकैः ॥ लवंगमालती सस्पृक्रमुवे त्रिफला चैव चिद
ह्मासाप रूषकाश्मर्यफलैः क्वापि फलोत्तमेतिकेयदेवः ॥ त्रिफलात्र फलापि चेति द्विरूपकोषः ॥ त्रि
फलाशब्दः समनार्थस्त्र फलाशब्द इति द्विगोरिति सूत्रे रक्षितः ॥ पुनर्नवा शोटी ॥ काकमाची काका ॥ प

॥ राज्ञः ॥ सृजतं समर्पयेद्धितम् ॥

लुङ्गि॥ अम्लीति॰ चांगेरिका अम्लपत्रिका॥ क्षुद्रा तु चांगेरी सुदाम्लाम्ललोणिकेति हारावली॥ अम्ति
कीचक्रफला॥ अम्लवेतसः॥ कालइति॰ कासमर्दकः शासूषाभेदः॥ कसौंदीतिख्यातः॥ मोघा पाटला त्रि
वृत्तश्यामा॥ दोला नीलिनी॥ मंजिष्ठा विकसा॥ कृष्णजीरकः उपकुंचिका॥ गांगेरुनागवला॥ कदली रंभा॥ कु
लीति॰ उद्दालो वनकोद्रवः कंटकारी॰ कुली क्षुद्रा निर्दिग्धेति केयदेवः॥ ढंढणो हृक धूमकः॥ वारिपर्णी तोय
वृक्षोहठः पानीयपृष्ठजा॥ कुली कुंभी तोयपर्णी॥ ढंढणो हृकधूमक इति केयदेवः॥ बदरी भित कोली॥ कोली

लुङ्गि अम्ली चाङ्गेरिकायां स्यादम्लाम्लिकां त्रियस्युभे अम्लोम्लवेतसे पुंसि कालः स्यात्कासमर्दके
कालमोघा त्रिवृद्दोलाम मञ्जिष्ठा कृष्णजीरके गाङ्गेरुकां चाथ कालीस्यात्कारस्या मथोकुली उद्दालेके
ए टकार्यं च ढण्ढणे बदरी भिदि कोली कोलि श्च कर्कन्धु तत्फले तु नपुंसकं कङ्कोलके च कोला तु पि
प्पली च व्ययो स्त्रियां चलस्तुरुष्के चाम्पेये जलं वालकनीरयोः जाली तु घोषके जालो नीपे ताले स्त
ले द्रुयोः तामलक्यां तु ताली स्यात्तालं तु नरमण्डने॥
(एति॰ कोलिश्चेति॰ कर्कन्धूर्बदरी॥ तत्फलेतयोः

फले। कंकोलकं उलं॥ पिप्पली कणा॥ चव्यं चविका॥ चलइति॰ तुरुष्कः शिलारसः॥ चाम्पेयः सुरभिः। चां
पेयश्चंपकोरम्यः शीतलः सुरभिश्चलइति केयदेवः॥ जलमिति॰ वालकं ह्रीवेरं। नीरमुदकं॥ जालीति॰ ता
ली च नेत्रुनिभृतस्थित कर्णतालाः इति॥ नीप कदम्बः॥ तालइति॰ तद्रोलेरव्यपत्रः प्रसिद्धः। तृणराजो
दीर्घतरुर्लेखपत्रो द्रुमेश्वर इति नाममाला॥ तालीइति च॥ तामलकी बदरफल केति जेद्रुटः॥ चंद्रनंदन
तालमलं तालं वर्णकं नरमंडनमिति माधवः॥ ॥

तूलइति० पिचुः कर्पासः॥ ब्रह्मदारौ पिचौ तूलमिति त्रिकांडशेषः॥ पुंल्लिंगस्तु पिचौ तूलः क्लीबं
स्याद्ब्रह्मदारुणीति रुद्रः॥ ब्रह्मदारुब्रह्मनिंबं॥ तूतइति लोके॥ तैलमिति० कल्कः सिद्धकैः। तिलस्नेहः
प्रसिद्धः॥ नलइति० पोटलः नज नलिनं कमलं॥ नलीक पोनचरणा॥ कुनटी मनःशिला॥ नाल
मिति० नालाइति च॥ पद्मदंडः कमलदंडः॥ शाककलंबकः॥ कलंबो नालिकाकारः सुषिरो वक्र
तो जयः। नाडिका तस्मात्स्यात्सुषिरा च॥ फलमिति० जातीफलं जातिकोषः॥ फलं लाभे जातिको

तूलो नस्त्री पिचौ तूलं क्लीबं स्याद्ब्रह्मदारुणि तैलं कल्के तिलस्नेहे नलः पोटगले नलम् नलि
ने पनलीनद्यां कुनद्यामपि योषिति नालं नालाय पद्मदंडे नाली शाककलम्बके फलं जातीफ
ले पूगे मदने च फलत्रिके कक्कोले च फली गन्धफल्यां चम्पककोरके फलः कुष्ठि च लंगाम्ध
रसे बाघाल के च लावक्ष्व स्तु शिम्बि धान्यस्य भेदे स्त्री दीप्य धीरयोः॥

॥ बाणाग्रे फलके पिचेति
रुद्रः॥ पूगमुद्वेगं॥ मदनं मदनफलं॥ फलत्रिकं त्रिफला॥ कंकोलं कंकोलीफलं॥ गंधफली प्रियंगुः॥ चं
पककोरकः चंपककलिका॥ कुष्ठः करमर्दः॥ करमर्दश्च कुष्ठश्च फलः पाकश्च समस्तइति सिंहः॥
वलमिति० गंधरसो बोलः॥ वाघालकः शीतकुंचिका॥ वंत्रइति० शिंबि धान्यभेदः॥ निष्पावो व
त्रको मतइति केयदेवः॥ दीप्यो यवानी मोदा॥ धीरा शतपत्री भेदः कुंजकाख्यः कूपकः कुंजकी वल्ली कुमारी

कुंकुमकार्येरतिकेयदेवः॥ वह्नीतु वह्निः स्मरलोति वाचस्पतिः॥

वाल इति॰ आचमनं ह्रीवेरं॥ ह्रीवेरं वालकं वारिवज्रमाचमनं कचमिति केयदेवः॥ पृथ्वी वालपुष्पा॥ वालेला त्रुटिः॥ भल्ली इति॰ भल्लातको ऽरुष्करः। अरलुर्भल्लूकः॥ शाल इति॰ अक्षिपीलुको देश्यका॰ रोमको रम्यको देश्यका शाका शशालो ऽक्षिपीलुक इति निघण्टुः॥ सर्ज्जको ऽश्वकर्णकः॥ साले तु सर्ज्जकार्श्याश्वकर्णकाः सस्यसंवर इत्यमरः॥ शालपर्णी सच्छता नव्यशोपी त्येके इति रामाश्रमाः॥ शालो हाल नेपमत्स्यप्रभेदे सर्ज्जपादये॥ शालाग्रहेनरुस्कंधशाखाप्राकारैकदेशयोरिति विश्वः॥ चारो मुनिप्रियः॥

वालोस्त्रियामाचमने पृथ्वीवालैलयोः स्त्रियाम् भल्लीभल्लातके भल्लोरलो शालो ऽक्षिपीलुके सर्ज्जे चारे पि शालुस्तु कषायद्रव्यचोरयोः शिलामनःशिलायां च शिलाजतुनि गैरिके शैलं तार्क्ष्ये च शैलेये सालो वरणसर्ज्जयोः त्रि अनलो ऽरुष्करे चित्रे पि॥ ॥

शालुरिति॰ कषायद्रव्यं कषायरसयुक्तद्रव्यं। चोरो निशाचरः॥ शिलेति॰ मनःशिला कुनटी॥ शिलाजतु शिलाधातुः॥ गैरिकं गिरिजम्॥ शैलमिति॰ तार्क्ष्यं तार्क्ष्यशैलं॥ शैलेयं शिलापुष्पं। शैलेयन द्वेषु शिलानले ष्विति कुमारः॥ साल इति॰ वरलो भ्रमरबंधुः॥ सर्ज्जश्चीठा॥ सालो वरणसर्ज्जयोरिति रंतादोरभसः॥ सालकाननशोभिनीति दंडी॥ त्रि॥ अनल इति॰ अरुष्करो भल्लातः॥ चित्रो ऽग्निकः॥ ॥ ॥

शिवप्र०

८९

६९

उद्दाल इति० वनकोद्रव: वनकोरदूष:॥व्रीहिभेद:॥ वनकोद्रवाकारतंडुल इति सिद्धमंत्रप्रकाश:॥ वरकोद्दा
लकोङ्गालचीनक्ष्यारदर्द्दुरा इति वाग्भटश्च॥ कोविदार: कांचनार:॥ मधुभेद: उद्दालाकृतं मधु॥ उत्पल
मिति० पुष्करं पुष्करमूले॥ कुष्ठ पारिभाव्यं॥ कमलमिति० जलजमब्जं॥ जलं पानीयं॥ कमलोत्तरसंलीनमी
नहंसांसघट्टनैरिति सिंग्रह:॥ ताम्रं सर्वधातु:॥ कपिल इति० चित्रो ग्निक:॥ कौंतीरेणुका॥ शिंशपामंडुलय
त्रा॥ कदलेति० कदलीव० पृश्नीवारिपर्णीकुंभीहठ इति समानार्था:॥ काष्ठीलिका रलपरंभा॥ कदलश्च

उद्दालो वनकोद्रवे व्रीहिभेदे कोविदारे मधुभेदे च नद्वयो: उत्पलं पुष्करे कुष्ठे कमलं जलजे जले ताम्रे
च कपिलश्चित्रे कौंती शिंशपयो: स्त्रियाम् कदला कदली पृश्न्यां कदली कदलावपि काष्ठीलिका
यां कदला शाल्मली भूरुहे पि च कराला कालमालायां तैले सर्ज्जरसस्य च पुमान् लोध्रे तुरोध्रे स्यात्क
ट्फल: सोमवल्कले कट्फला कृष्णवृंताया कन्दलो भिनवोद्भिदि स्त्रीरम्भाभूमिकन्दल्यो:॥

कदल्यसावितिमाधि:॥ शाल्मली भूरुह: स्थिरायु:॥ करालेति० कालमाला कुबेरक:॥ सर्ज्जरसश्चीढा॥
रोध्र: शावर:॥ कट्फल इति०॥ सोमवल्कल: द्रवती॥ कृष्णवृंता पाटला॥ कन्दल इति० अभिनवोद्भित
नवांकुर:॥ कंदल: कलहे युद्धे नवांकुर कपालयोरिति लोचन:॥ मया दृष्ट: पाणिर्ल्ललितलवली कंदल
निभ इति भवभूति:॥ रंभा कदली॥ ध्वजांशुकैस्तद्धित कंदलीदल इत्ति माघ:॥ भूमिकंदली॥ द्रोणप
र्णी॥ स्निग्धकंदा कंदली भूमिकंदलीति शब्दार्णव:॥ कंदली श्वेतश्लक्ष्णा वज्रपुट: कंदविशेष: सर्पछत्र ८९

काकोलइति॰ विषंक्ष्वेडः ॥ काणा वीरा ॥ कीलालमिति॰ कुंकुमंधीरं ॥ वालकं वारि ॥ कुवलमिति॰ उत्पलंकमलं मुक्ताफलंमौक्तिकं ॥ कुवलीकर्कंधूः ॥ बदरी कुवली चकर्कंधूरितिहलायुधः ॥ कुंडलीति॰ आरग्वधः संपाकः ॥ कंदरो हिलीगुडूची ॥ कोविदारः कांचनारः ॥ कुटिलेति॰ देवीसृक्का ॥ जिह्मंतगरं ॥ ग्रंथिलइति॰ गोक्षुरस्त्रिकटः ॥ विल्वः शांडिल्यः ॥ करीरोगूढपत्रः ॥ विकंकतः स्रुवावृक्षः कंटकारिका ॥ गोरिलइति॰ कटुस्नेहः सर्षपतैलं ॥ लोहचूर्णमयोरजः ॥ चक्रलेति॰ ॥ गुंजाकाकणंति ॥ छत्रमुस्तंमुस्ताभेदः ॥ पक्षेछत्रमुस्त

काकोलोजरत्स्त्रियांविषेकाणायांस्यादथकीलालंकुङ्कुमेवालकेपिच कुवलंतूत्पलेमुक्ताफलेपिकु
वलीफलेकुण्डल्यारग्वधेकन्दरोहिण्यामप्यथद्वयोः । कोविदारेचकुटिलादेव्यांजिह्मंतुनद्वयोः ग्र ॥
न्थिलोगोक्षुरेविल्वेकरीरेचविकङ्कते गोरिलस्तुकटुस्नेहेलोहचूर्णेपिचक्रला गुञ्जायांछत्रमुस्तेच मि ३७
चपलः सूतसिद्धयोः शौण्ड्यांप्योषितिचूडालागुञ्जायांछत्रमुस्तके ॥ जगलः पिष्टमद्ये-चमेदकेमद

कंतत्र चूडाला चक्रलोच्चटेति सिंहः ॥ चपलइति॰ सूतः पारदः ॥ रसेंद्रःपारदः सूतः पारदश्चपलोपि चेति धर्मिष्ठः ॥ सिद्धः शिलारसः ॥ शौंडीपिप्पली ॥ चूडालेति॰ गुंजारक्तिका ॥ छत्रमुस्तकंमुस्ताभेदः ॥ जगलइति॰ पिष्टमद्यंपिष्टकृतंमद्यं ॥ मेदकोजगलादधः स्थोमद्यावयवः ॥ किण्वंवक्कसमेदकजगलाः कादंबरीप्रसन्नेचवक्षुश्छसमाद्रीसाद्रासमद्रवाः क्रमोर्द्धगामधे ॥ समोत्रपूर्वैस्तिरावस्थासाधारणः ॥ मदनद्रुमोराढः ॥ ॥

जटिलेति० उग्रा वचा॥ नलदमुशीरं॥ जंभल इति० दंतहर्षणो जंबीरः॥ अ ङ्कोलः पिका॥ जम्बूल इति० श्यामपत्रः॥ जंबुविटपः॥ हलीमकः ऋकचच्छदः॥ जंबूले जंबुविटपे जंबूलः ऋकच्छद इति लोचनः॥ तरल इति० धत्तूरः कनकाह्वयः॥ यवागूः परिसिक्थ्या॥ सुरा मद्यं॥ तमाल इति० तिलकः श्रीमान्॥ काल स्कंधस्तापिच्छः। वरुणद्रुमः सेतुवृक्षः॥ तण्डुल इति० धान्यनिकरः धान्यसमूहः॥ वेद्रं विडंगं॥ तंडुलश्च क्रिमिघ्नश्च

जटिलोग्रा नलदयो जम्भलो दन्तहर्षणे जम्भलोऽङ्कोऽपि जम्बूलः श्यामपत्रे हलीमके तरलः पुंसि धत्तूरे यवागूः सुरयोः स्त्रियाम् तमालस्तिलके कालस्कन्धे च वरुणद्रुमे तण्डुलो धान्यनिकरे वेद्रे तण्डुलमस्त्रियाम् ताम्बूली नागवल्ल्यां च ताम्बूलं क्रमुकीफले नकुली कुक्कुटीमांस्योरथ स्यान्नाकुली स्त्रियाम् रास्नाभित्कुक्कुटीकन्दचव्यके चाक्षपीडके निचुलः स्थलसम्भूतवेतसे चाम्बुवेतसे॥ ॥

त्समरः॥ क्रिमिघ्नं तंडुलं मोघेति वाचस्पतिः॥ ताम्बूलीति० नागवल्ली प्रसिद्धा॥ क्रमुकीफलमुद्वेगः॥ नकुलीति० कुक्कुटी वल्ली कन्दः स च व्याख्यातः॥ मांसी जटामांसी॥ नाकुलीति० रास्नाभित। नाकुली सर्पगंधा च सुवहा भोगिगंधिका। सर्प्याक्षी नकुलेष्टा चेति भावनाम गुणमाला॥ ना ९०
र इति लोके॥ कुक्कुटीकंदो व्याख्यातः॥ चव्यं चविका॥ अक्षपीडकः शंखिनी॥ निचुल इति० स्थलवेतसः स्पष्टं॥ वानीरे कपिभेदे स्यान्निचुलः स्थलवेतसे इति शब्दार्णवः। वेतसः हिज्जलेः॥ ॥

नेपाल इति॰ इक्षुभेदेऽनेनैवनाम्ना ख्यातः॥ शतपर्वककान्तार नेपालाद्यास्ततः क्रमादिति वाग्भटः। सुवहा रास्ना शिला कुनटी॥ नेपाली कुनटी गोला शिलादि औषधिः स्मृतेति निघंटुः॥ मनोज्ञा शिशु गंधिका। नेपाली चेति केयदेवः। पललमिति॰ कर्दमो जंबालः॥ पलमामिषं॥ तिलपिष्टं तिलकल्कः॥ प्रवाल इति॰ किसलं किसलयं। नवेत। स्मि न्किसलयं किसलं पल्लव इति हैमः॥ अथ पल्लवः। विसलं किसलं चेति त्रिकांडशेषः॥ पल्लवोऽस्त्री किसलयमित्यमरः। किसलयैः सलयैः सलयैरितिरधुयमकादृ

नेपालस्स्यादिक्षुभेदे सुवहायांतु योषिति शिलायां च मनोज्ञायां पललं कर्दमे पले तिलपि
ष्टेप्रवालोऽस्त्री किसले विद्रुमद्रुमे पाटला पाटलिरोपुष्पे स्यात्पाटलेत्रिषुः पाटली पाटलायां
स्यादाशुव्रीहौ तु पाटलः पिप्पलः केसवावासे पिप्पलं सर्वतोमुखे पिप्पली तूपकुल्यायाम् ॥

समध्याः॥ प्रवालोऽस्त्री विद्रुमे नवपल्लव इति लोचनः॥ विद्रुमद्रुमो यथा ववल्लरी॥ पाटलिः पाटलामोघे त्यमरः॥ अस्याः पाटलायाः पुष्पे वाच्ये त्रिषु त्रिलिंगः पुष्पेऽपि विपि पाटलेत्यमरः। अपि शब्दात्स्त्री त्वं चेति रामाश्रमाः॥ पाटलः कुसुमे वर्णे प्यास्तुव्रीहिश्च पाटल इति शाश्वतात्पुल्लिंगश्च। पाटलायां पाटलीत्यपि। आशुव्रीहिः आशुपाकी व्रीहिः॥ आशुव्रीहौ पाटलो नाश्वेतरक्तेत्यलिंगयानितिरु द्रः॥ पिप्पल इति॰ केशवावासश्चलदलः॥ सर्वतोमुखं सलिलम्। पुष्करं सर्वतोमुखमित्यमरः॥

पिचुल इति॰ रक्तलो जलवेतसः॥ पिचुलो झावुके पुंसि निचुले जलवायस इति लोचनः॥ तेन तवर्गपंच
मादिरपीति सिद्धम्॥ वानीरः कपिभेदः स्यान्निचुलः स्थलवेतस इति शब्दार्णवः। स्थानादस्मात्सर
सनिचुलादुत्पतोदङ्मुखः खमित्यभियुक्तप्रयोगाच्च॥ पिच्छिल इति॰ द्विजकुत्सितः श्लेष्मातकः॥ तू
लिनी शाल्मली॥ कृष्णसारा शिंशपा॥ पोतिका उपोदिका॥ भव्यं कर्मरंगफलम्॥ पिंगलेति॰ रुचीरो

पिचुलस्त्विङ्गाले नरि झावुके कंवुके चापि पिच्छिलो द्विजकुत्सिते तूलिन्यां कृष्णसारायां पोतिका
यां च पिच्छिला भव्ये ऽलीवं पिङ्गला तु रूचौ ऽलीवं तु पत्रके पिच्चलातोयपिप्पल्यामारकूटे तु पित्तल
म् फेनिलः स्यादरिष्टे पिफेनिलं वदरीफले मदने वकुले ऽलायां नीलिन्यां महिला त्रियाम् गु
न्द्रायां भस्मगन्धिन्यां मातुलः कनकाह्वये फले राव स्य भङ्गायां मातुलानी च मातुली॥

चना॥ पत्रकं तमालपत्रम्॥ पित्तलमिति॰ तोयपिप्पली जलपिप्पली॥ आरकूटं रीतिः॥ पादेन
रसकेनाद्यं तत्सत्वेनाथवाद्भुतं॥ अंतर्धूमं द्रुतं शुल्वं पित्तलं स्वर्णसन्निभमिति। फेनिल इति॰ अ
रिष्टो रक्षावीजः॥ वदरीफलं कोलं॥ मदनः मदनफलं। वकुलेति॰ एला द्राविडी। सूक्ष्मैला द्रा ९१
विडी तु स्यात्गौरांगी वकुला त्रुटिरिति धन्वंतरिः॥ नीलिनी नीली॥ महिलेति॰ गुंद्रा प्रियंगुः। भस्म
गंधिनी रेणुका॥ मातुल इति॰ कनकाह्वयो धत्तूरः॥ राव मदनफलं॥ भंगा विजया॥ ॥ ॥

मुसलीति॰ तालमूली हिरण्यपुष्पी ॥ आखुकर्णी स्वल्पी ॥ सितकंगुः शमठी ॥ ईस्यमध्यः ॥ मुसलव
णुने ॥ मूर्द्धन्यमध्योप्पयमितिवर्णदेशना ॥ मुसखंडनइतिधातो र्दन्त्यांतेषु मूर्द्धन्यांतेषु चवोपदेवा
त्रेयादिभिः पठितत्वात् ॥ उज्ज्वलदत्तादयस्तु तालव्यमध्यमप्याहुः ॥ अतएवमुसल्येमुशल्यपि
चेति द्विरूपेषु विश्वः ॥ मृणालमिति॰ नलदमुशीरं ॥ विसमंमृणालं ॥ रसालेति॰ सुरसा शिखरिणी ॥

मुसलीतालमूल्याखुपर्णिका सितकङ्गु मृणालंनलदेऽक्लीबं पुन्नपुंसकयोर्विसं
रसालासुरसादूर्वाविदारीगोस्तनीषुच रसालंसिह्लकेचालेरसालः पौंड्रचूतयोः ॥

तल्लक्षणंतु ॥ अर्द्धाढकं त्वचिरपर्युषितस्यदध्नः खंडस्यषोडशपलानि शशिप्रभस्य ॥ सर्पिः
पलंमधुपलंमरिचंद्विकर्षं शुंठ्याः पलार्द्धमपि चार्द्धपलंचतुर्णां ॥ श्लक्ष्णेपटेललनया मृदुपाणि
घृष्टाकर्पूरवाससुरभीकृतभांडसंस्था ॥ एषा वृकोदरकृता सुरसा रसाला या स्वादिता भगव
तापुरुषोत्तमेन ॥ दूर्वा हरिताली ॥ विदारी विदारीकंदः ॥ गोस्तनी द्राक्षा ॥ सिह्लकः शिलारसः ॥
वालो गंधरसः ॥ पौंड्र इक्षुश्रेष्ठः ॥ चूत आम्रः ॥ ॥

शिवप्र॰
९२

लाङ्गलीति॰ लाङ्गलं च ॥ चोचनालिकेरः ॥ पृष्ठिपर्णी ॥ शृगालविन्नाघ तिलालांगलीपर्णिकामता ॥ पृष्ठिपर्णी चेति केयदेवः ॥ कंचरं जलपिप्पली ॥ विशल्याकलिकारी ॥ वल्कलेति॰ गुडत्वक् भृंगं ॥ तेजोव तीते जिनीति जोवल्यलिकेति समानार्थाः ॥ वञ्जुल इति॰ तिनिशः स्यंदनः ॥ अशोको वीतशोकः ॥ वेतसो न म्रकः ॥ शोको वानीरो वंजुलस्तथेति ॥ विमलेति सातलासिकुंदः ॥ पद्मकाष्ठं पद्मवर्णी ॥ विदुल इति॰ अम्लवेत सः वेतसाम्लः ॥ वेतसो नम्रकः ॥ श्यामल इति॰ चदेलेलः पिप्पलः ॥ लवली फलं राजवदरं ॥ शाल्मलीति॰

लाङ्गली लाङ्गलं चोचे पृष्ठिपर्ण्यां तु लाङ्गली कच्चटे तु विशल्यायां वल्कला तु गुडत्वचि तेजोवत्यां व ञ्जुलस्तु तिनिशाशोकवेतसे विमला सीतलायां स्याद्विमलः पद्मकाष्ठके विदुलस्तु पुमानम्लवे तसे चापि वेतसे श्यामलः स्याच्चलदले श्यामलं लवलीफले शाल्मली रक्तपुष्पायां तद्भवा वे तु शाल्मलः । शीतलं पुष्पकासीसे कर्पूरे मलयोद्भवे शैलजे च पुमान्हेमपुष्पे मरिचपत्रके श्रीफली नीलिका धात्र्योर्नाविल्वे चिह्नलोद्वयोः शीवलं स्याच्च शीवाले शैलेये च नपुंसकम् ॥

रक्तपुष्पा मोचा ॥ तद्भवा मोचरसः । शीतलमिति॰ पुष्पकासीसं भूमिजो धातुः ॥ कर्पूरं हिमं ॥ मल योद्भवं चंदनं ॥ शैलजं पलितम् ॥ हेमपुष्पश्चंपकः । मरिचपत्रकः ॥ शालः ॥ शालः सर्जः सर्जरसः कांतो म रिचपत्रकः ॥ शक्रधुरसनिर्यासः श्रीकरः शीतलस्तथेति केयदेवः ॥ श्रीफलीति॰ नीलिका रंजनी ॥ तुत्था श्रीफलिका मेला सारवाही च रंजनीति निघंटुः ॥ धात्री आमलकी ॥ विल्वं शैलूरवः ॥ विम्बलः पूगः ॥ शीवलमिति॰ शीवालः शैवलः ॥ शैलेयं शि शिलापुष्पं ॥ ९२

शैवलइति॰ शैवालः शैवलः॥पद्मकाष्ठं पद्मवर्णं॥सरलइति॰पूतिकाष्ठं देवदारु॥त्रिवृद्धित-कृष्णात्रि
वृत॥श्यामामसूरविदृसापालिंदी सरलातथेति कृदयदीपकः॥केचित्सरणे स्यात्कृः॥सप्तलेति॰ग्रै
ष्मिकानवमालिका॥भूरिफेनासातला॥चूडामणिर्गुंजा॥हिङ्गुलइति॰ वर्णकद्र्व्यंहंसपाकाख्यं॥
भंटाकीकंटकारी॥लचा॥अम्रणालइति॰उशीरंनलदं॥दीर्घमूलं वीरणं॥एकाष्ठीलेति॰पापचेली
वनतिक्ता॥बुकोवकपुष्पः॥शिवमल्ली पाशुपतएकाष्ठीलोवको वसुरित्यमरः॥एकाष्ठीलावनति

शैवलः पुंसिशैवालेस्त्रीचंस्यात्पद्मकाष्ठके सरलः पूतिकाष्ठेस्यात्सरलानुत्रिवृद्भिदि सप्तला
ग्रैष्मिकाभूरिफेनाचूडामणिस्त्वपि हिङ्गुलोवर्णकद्र्व्येनाभण्डास्त्रांतु हिङ्गुलीलचअम्रणाल
मुशीरेस्याद्दीर्घमूलेवनद्वयोः एकाष्ठीलास्त्रियांपुंसिपापचेल्यांबुकेक्रमात् कन्दरालः पामा
नार्द्दभाण्डेप्लक्षतरावपि अथकर्षफलोधात्र्यांविभीतकतरावपि क्षीरवल्लीहेमदुग्धाविदारी
क्षीरिणीष्वच अथगन्धफलीफल्यांचम्पकेस्यचकोरके॥ ॥एकौषधौपुंसिवकपुष्पेरति॥काकुल

इतिख्यातोर्कभेदइतिवृद्धाः॥कन्दरालइति॰गर्द्दभाण्डः सुपार्श्वकः॥गर्द्दभाण्डेकंदरालकपीतनसुपा
र्श्वकाइत्यमरः॥प्लक्षतरुः पर्कटी॥अथकर्षफलइति॰धात्रीआमलकी॥विभीतकविभीतकत
रुरक्षः प्लक्षक्षीरवल्लीति॰हेमदुग्धाहेमक्षीरी॥विदारीविदारीकंदः॥क्षीरिणीदुग्धिका॥अथग
न्धफलीति॰फलीप्रियंगुः॥प्रियंगुः फलिनीफली॥चंपककोरकः चंपककलिका॥कोरकजालक

प्रियंगौ फलिनी गंधफली चंपककोरककोरकजालकं॥
कलिकाकुड्मलमुकुलकलितातरं॥

शिवप्र०
९३

गन्धमूलेति॰ पद्मनाडीपुष्करपर्णी॥ सुरभीरास्ना॥ द्राविडः कर्चूरः॥ ताम्रमूलेति॥ दुरालंभा दुरालभा
॥ समंगा मंजिष्ठा॥ अंजलिकारकोलज्जालुः॥ तोयवल्लीति॰ अंबुसुषवीपलाशिकाद्रवल्लीति
पयवल्ली [illegible]॰ ह्स्वफलापिचकारवल्लीवारवल्लीसुषवीसुकुमारिकेतिकेयदेवः॥ लांगलिकीजलपि
प्पली॥ दलामलमिति॰ फलिंजको मरुकेवेः॥ दमनः पुष्पचामरः॥ दीर्घमूलइति॰ यवासकोयो
सः॥ स्थिराशालिपर्णी॥ गोपीसारिवा॥ वेल्लंतरो वीरतरः॥ उशीरमिंदिलेके॥ शरोवाणः॥ प्राचीवल

गंन्धमूलापद्मनाड्यांसुरभौद्राविडेपुमान् ताम्रमूलादुरालम्भासमङ्गाञ्जलिकारकेतोय
वल्ल्यम्बुसुषवीलाङ्गलिक्योर्दलामलम् फलिञ्जकेचदमनेदीर्घमूलोयवासके दीर्घमूलास्थि
रागोप्योःस्त्रीचवेल्लन्तरेशरेप्राचीवलोम्बुपिप्पल्यांकाकाङ्गाणंडदूर्वयोः अथपुष्पफला
नीलम्पांवुसितालकपित्थयोः कूष्मांडेतुद्वयोः पोटगलःकाशनलेपुमान् अथोवक्र
फलोनीपेनामलध्वांतुयोषिति काकमाच्यामयोस्त्रीचंविज्ञेयंकटुकाफले॥ ॥

इति॥ अंबुपिप्पलीजलपिप्पली॥ काकाङ्गाकाकजंघा॥ गंड दूर्वागलिंनी अथपुष्पफलेति॰ नी
लीनीलिनी॥ तालस्तलः॥ कपित्थो दधित्थः॥ अमरमालायांपवर्गतृतीयमध्योपीतिरामाश्र
माः॥ कूष्मांडः कुसुमफलं॥ पोटगलइति॰ काशश्चामपुष्पः॥ नलोनडः॥ अथो वक्रफलइति॰ नी
पो धूलीकदंवः॥ मलयूः काष्ठोदुंवरिका॥ योपधोपि॥ काकमाचीकाकाङ्गा॥ कटुकाफलं कंकोलम्॥ ९३

महावल्लमिति॰सीसकंनागं॥भारद्वाजीमहासहा॥महाफलेति॰कूष्मांडीपुष्पफललता॥चो
चं नालिकेरफलं विल्वं श्रीफलः॥मुक्ताफलमिति॰कर्पूरं हिमवालुका॥मौक्तिकमुक्ताफलं॥
लवलीफलश्यामलं॥यवफलइति॰मांसिका जटामांसी॥कुटजइंद्रवृक्षः॥त्वचिसारोवंशः॥
अथरक्तफलेति॰विंबीतुंडिकेरी वटः वकूपात्।वृश्चिकालीति॰मेषशृंगी अजशृंगी॥अज
भि३
महावल्लंसीसकेस्याद्भारद्वाज्यांमहावला महाफलातुकूष्मांड्यांपुल्लिंगः श्रीचविल्वयोः मुक्ताफ
लंतुकर्पूरमौक्तिकेलवलीफले यवफलोमांसिकायांकुटजत्वचिसारयोः अथरक्तफलाविम्बांव
टेरक्तफलः पुमान् वृश्चिकालीमेषशृङ्ग्यावर्षाभूर्हिरिचक्रियाम् समष्ठिलस्तोयमार्गेगंडीरेतुस
मष्ठिलासदाफलोनालिकेरेमालूरेजन्तुमत्फले सोमवल्ल्यमृताब्राह्मीचक्रांकावाकुचीकुच
शृंगीमेषशृंगीसर्पदंष्ट्राचवार्त्तिका।द्वितीयादक्षिणावर्त्तावृश्चिकालीविषाणिकेतिधन्वंतरिः॥व
र्षाभूर्भिन्नपुनर्नवाभेदः॥समष्ठिलइति॰तोयमार्गेजिल्लमयूरकः॥गंडीरोगंडदूर्वासदाफलइति॰
नालिकेरःघ्राणनेत्रः॥मालूरः श्रीफलोविल्वइतिहलायुधः॥जंतुमत्फलउदुंबरः॥उदुंबरेगंधफले
नालिकेरेसदाफलइतिलोचनः॥सोमवल्लीति॰अमृतागुडूची॥ब्राह्मीस्मारिणी॥चक्रांकाकु

शि॰ द्रम॰
९४

अथसोवर्च्चलमिति॰ स्वर्जिक्षारः सर्जिकाक्षारः॥ रुचकंलवरं सुगंधिलवणं॥ हरितालीति॰ दूर्व्वाहरिता॥ काशोदीर्घपत्रः॥ तालंनटमंडनं॥ लयम्॥ अंगारवल्लीति॰ शार्ङ्गेष्टावल्लीकरंजः॥ भार्गीकर्कशः॥ अंगारवल्ली वाल्लेयशाकः चर्वरवर्द्धकाइत्यमरः॥ गर्द्दभशाकोप्यत्रैव॥ ब्रह्मनेटीतिरोकस्याता॥ ज्वालामुखीअग्निज्वाला॥ अग्नियाइतिलोके॥ जघनेफलेति॰ मलयूः काष्ठोदुंवरिका॥ पनसःकंटकिफलः॥ श्लेष्मातकसदृक्पत्रः

अथसोवर्च्चलंस्वर्जिक्षारे चरुचलवणान्तरे हरितालीतुदूर्व्वायांकाशेतालेतुनद्वयोः लयम् अङ्गारवल्लीशार्ङ्गेष्टभार्गीज्वालामुखीषुच जघनेफलामलयूर्वाघ्रापनसेजघनेफलः लवटू क्षुद्रपाकफलः पुंसिस्त्रियांचकरमर्द्दके क्षुद्रपाकफलालुम्बीखर्जूरीवाकुचीष्वपि रसायनफलाधात्रीमाचिकारुष्करेषुच लान्ना: वल्ह्वि स्त्रचश्छिक्काराजिकयोजीवरस्तुमधुरप्रिये महानिंबेपिजीवास्यात्जीवंती वचयोरपि दार्वीदारुहरिद्रायांगोजिह्वायामपिस्त्रियाम्॥

((सुपाल्कंटकिफलस्तथा॥ पनसश्चाशयफल

दुतिकेयदेवः॥ लवटू॥ क्षुद्रपाकफलइति॰ करमर्द्दकः क्षुद्रः॥ तुंबलाबूः॥ खर्जूरीदुरारोहा॥ वाकुचीसोमराजी॥ रसायफलेति॰ धात्रीआमलकी॥ माचिकाकाकमाची॥ अरुष्करोभल्लातः॥ लान्नाः॥ वल्ह्वि॥ स्त्रचरति॰ छिक्कास्तुलकरी॥ राजिकाआसुरी॥ जीवरति॰ मधुरप्रियोजीवटः॥ महानिंबोद्रेक्का॥ जीवन्तीजीवनीया॥ वचाहेमवती॥ दार्व्वीति॰ दारुहरिद्रापचंपचा॥ गोजिह्वाधेनुजिह्विका॥ भूलग्नाखशीलीदीर्घ ९४

देवीति॰ कुमारीकासह॥स्प्टक्का कुटिला॥जायंती चत्रामोटा॥तेजिनी तेजोह्वा॥विद्रुकली कुचेलिका॥एके
षी त्रिसरा देवी विद्रुकली कुचेलिकेति धर्म्मिष्ठः॥पीलुपर्णी मूर्वा॥मूर्वादिवीमधुरसा मोरटा तेजिनी स्रवा॥म
धूलिका मधुश्रेणी गोकर्णी पीलुपर्ण्यपीत्यमरः॥वन्ध्याककोटिकी मनोज्ञा॥धवइति॰ भरोद्दहः शकटाक्ष
॥धूर्त्तः कनकाह्वयः॥ध्रुवइति॰ शंखः कंबुः॥वटः वङ्कयान्त॥मूर्वा मधुरसा॥शालिपर्णी स्थिरा॥प्लवइ
ति॰ प्लक्षः गर्द्दभांडः॥शिलारसस्तुरुष्कः॥विकंकतः सुवनरुः॥त्रुक्षाम्लेति तिंतिडीकं॥भेलो भल्लातकः॥

देवी कुमारिका स्पृक्का जयन्ती तेजनीषु च विद्रुकली पीलुपर्णी वन्ध्याककोटकीष्वपि धवो भरोद्द
हे धूर्त्ते ध्रुवः शङ्खे वटेपि च ध्रुवा मूर्वाशालिपर्ण्योः प्लवः प्लक्षे शिलारसे विकङ्कते च त्रुक्षाम्ले भेलके
कुलके पि च कैवर्त्तीमुस्तके गन्धतलेपि स्यान्नपुंसकं मद्दीका स्यादतिविषयोर्यवोष्ट्रप्रियइन्द्रजे स
ल्लकके करञ्जेपि विश्वा विश्वं च नागरे ज्ञीवं गन्धरसे चोपविषा शङ्खाह्वयोः स्त्रियाम्॥

कुलकं पटोलं॥कैवर्त्ती मुस्तकं॥प्लवगो पुरगो नर्द्दकैवर्त्ती मुस्तकानि चेति॰ इयं विमुन्नकनाम्नो वृक्षस्त्व
कमुस्ताकृतिरितिभावमिश्रः॥गंधतलं रामकर्पूरा रसं॥मद्दीति॰ द्राक्षाहारहूरा॥अतिविषाश्चुल्ल
कंदा॥यवइति॰ अश्वप्रियो यवान्नं॥इंद्रयवइंद्रयवः॥मैलहेति॰ अलक्तं वस्त्ररंजनं करंजः करञ्जः॥
विश्वेति॰ नागरं शुंठी॥गंधरसो वोलः॥उपविषा विषा॥शंखाह्वा चोरपुष्पी॥शंखिनी नाकुली
विश्वा चोरपुष्पी सुकेशिनी तिवेयदेवः॥ ॥ ॥

शिव इति० पुरो गुग्गुलुः॥ पुंडरीकं कालं॥ बकुलो मधरोहरः॥ शिविः सिंहो मू० पुष्पं ः कुष्टत्वकमुकु
रः॥ शिव इति धर्म्मिष्ठः॥ सैंधवं माणिमंथ्यं॥ कुंभी भद्रवती॥ महाकुंभी च कुंभीका भद्रा भद्रवती शिवेति
भावमिश्रः॥ अभया हरीतकी॥ धात्री आमलकी॥ भूधात्री भूम्यामलकी॥ शमी शक्तुफला॥ शिविरिति०
भूर्ज्जे लिखपत्रः॥ बकुलो मधरोहरः॥ स्वाद्वीति० श्रेणीखर्ज्जूरी॥ रसाला शिखरिणी॥ अथ स्तुवेति०

शिवः पुरे पुण्डरीके बकुले सैंधवे शिवम् शिवा कुम्भ्यभयाधात्री भूमिधात्री शमीषु च शि
विर्भूर्ज्जे च बकुले स्वाद्वी श्रेणी रसाले तयोः अथ स्तुवा स्याच्छत्रकायां मूर्वा धूली कदम्बयोः वत्रि
अस्मीवमन्त्रि स्ववलो न स्त्री पुंसि घनच्छदे कारवी रामठी घोषाजमोदा कृष्णजीरके कितवश्चो
९ रके धूर्त्ते॥ ॥ ॥

शच्छकी गजभक्ष्या॥ मूर्वा मधुरसा॥ मुर्व त्विव धातिः मुर्व बंधने॥
अचू दीर्घत्वं टाप्‌० मूर्वा॥ ङीषि मूर्वीति न्यासः॥ धूली कदंबो नीपः॥ वत्रि॥ अस्मीवमिति० अन्त्रि
स्ववलं वस्तिरं॥ अस्मीवं वस्तिरं॥ शिग्रोर्नाऽमन्त्रे पुनरन्यवदिति मेदिनी॥ अस्मीवो वस्तिरे पुमानि
ति लोचनः॥ घनच्छदः शिग्रुः॥ शोभांजने शिग्रुतीक्ष्णगन्धकाक्षीवमोचकाऽस्समरः॥ दीर्घो दि
रपीति मुकुटः॥ कारवीति० रामठी लवपुत्री॥ घोषा मधुरिका॥ अजमोदा मोदा॥ कृष्णजीरकः का
लाजाजी॥ कितव इति० चोरकोगणहासकः ग्रंथिपर्णे

[illegible] ९५

कैरवमिति॰ कुमुदं कुमुदं॥ सितोत्पलं गर्दभकं चंद्रेष्टं कैरवं कुमुदं। कुमुदं चेति केयदेवः॥ रात्रिविकासि॥ अं
बुजं पंकजं। पंकेरुहं श्वेतपद्मं सरोजं अंबुजं पंकजं॥ कैरवं चाब्जमंभोजं नलिनं भद्रकं कुहमिति केयदेवः॥ तच्चदि
नविकासि॥ घनतरघनवृन्दच्छादितेप्यम्बिलोकेसवितुरथसुधांशोः संकथैव अरंसीत्॥ दिवसरजनिभेदं मं
दवाताः शशंसुः कमलकुमुदगंधानाहरंतः क्रमेणेति स्पष्टम्॥ पद्मवीति॰ सहदेवा महाबला॥ नागबला गांगेरु
की॥ माधवीति॰ कुंभीपाटला॥ नेपाली नवमालिका॥ अतिमुक्तोभ्रमरोत्सवः॥ वीरा दैत्या गंधकुटी माधवी गं
गंधमादनीति त्रिकांडशेषः॥ स्याद्शर्करा मधुशर्करा॥ जरणो जाजी॥ आम्रश्चूतः॥ अश्वत्थो वटः॥ सि

कैरवं कुमुदे स्त्रु जे पद्वी सहदेवायां नागबलायां च माधवी कुसुमाम् नेपाल्यामतिमुक्ते वीरायां स्याद्
शर्करायां च स्त्री वं जरणेथ आम्रश्च स्थे सिक्थे च किंशुके पुंसि शताह्वा मधुसंभूत शर्करा जातियोत्रि ॥
षु शण्हाधकसुवचाकंम्बुमालिन्यो दधिघनद्वयोः सारिचागोपकन्यायां सारिवः शालिभिद्यपि सुषवी ॥
कारवेल्ले स्याज्जीरके कृष्णजीरके॥ ॥ स्यं मयलं॥ किंसुकः पलाशः॥ शताह्वेति॰ मधुसंभूतशर्करा मधुश
र्करा॥ जाती मालती॥ पोत्री वाराही कंदः॥ शण्हाह्वेति॰ वचा हेमवती॥ कम्बुमालिनी शंखपुष्पी॥ दधिश्री घन
म्॥ सारिवेति॰ गोपकन्या गोपालिका॥ शालिभित् प्रमोदे गोरसा रिवाषिति सिद्धमंत्रप्रकाशः॥ सुषवीति॰
कारवेल्लः कठिल्लः॥ जीरके जाजी॥ कृष्णजीरकः कालाजाजी॥ सुषवी दंत समूर्द्धन्यवनी तिस्वामी॥ तास्त्रव

वच॥धामार्गवइति॰अपामार्गः खरमंजरी॥ घोषकः कोशातकी॥अधामार्गवदूनिस्वामी॥अधामार्गो
वाऽपामार्गः कोशातकी चेति प्रथर्थैधन्वंतरिः॥मरूकवइति॰कर्प्पासआच्छादनफलः॥कर्पासीति च॥
खदिरोदन्तधावनः॥यवासोयासः॥मधुस्रवेति॰धवश्रेणीमूर्वा॥जीवाजीवन्ती॥हंसपदीहंसपादीरक्त
पादीमधुस्रवेतिसमानार्थाः॥मधुयष्टीक्लीतकं॥वारिभवइति॰नखोव्याघ्रनखः॥शंखोवारिचरः॥
शैवलःशैवालः॥शीतशिवमिति॰शैलेयःशिलापुष्पं॥सिंधुसैंधवं॥मिसिःशतपुष्पा॥सहदे

वच धामार्गवस्तुपुंसिस्यादपामार्गेचघोषके मरू— — —कर्प्पासेखदिरे चयवासके मधु
स्रवाधवश्रेणीजीवाहंसपदीषुच मधुयष्ट्यांवारिभवोनखेशंखेचशैवले शीतशिवंशै
लेयेसिंधुनिमिस्यांतुशीतशिवः सहदेवीसर्पाक्ष्यांसहदेवासारिवाबलयोः वयम् वारिसं
भवमम्भोजेम्भोरवलेशिखरेपिच वान्नाः शद्धिं कुशंजलेऽस्त्रियांदर्भेनिशादावीहरिद्रयोः॥

वीति॰सर्प्पाक्षीपदवी॥यन्नटाशिरोवद्धाप्रभावाज्ज्वरंहंति॥सहदेवाइतिच।पदवीसहदेवायांनागवल्ला
यामितिहृदयदीपकः॥सारिवागोपी॥बलात्रपीतपुष्पाकंकतिका॥अन्येबलानीलपुष्पामाकुः॥
लोचनस्तुपुंस्याह॥सहदेवोबलादंडोत्पलयोःसारिवौषधाविति॥वयम्॥वारिसंभवमिति॰अंभो ९६
जेकमलं॥अंभोखेचंदनं।शिखरंपक्वदाडिमसंकाशंमाणिक्यंशिखरंविदुरिति॥वान्नाः॥शद्धि॥
कुशमिति॰जलमंबु॥दर्भःकुशः॥ ॥

पांशुरिति॰ रजोधूलि॥ सस्यार्थे चिरसंचितगोमयमितिस्पष्टम्॥ तालव्या अपि दन्त्याश्च शंवश्शूक
पांशवः॥ कलशः शंवलं चैव जिह्वायां रशनातथेति द्विरूपेषु विश्वः॥ शान्त्रि॥ कपिशेति॰ अतिमुक्तो
माधवी त्रिमिपिंडितः सिह्लः॥ कर्कशइति॰ इक्षुभित्का ष्ठेक्षु॥ काशमर्दः॥ कासघ्नः॥ कासघ्नः कर्क
शोऽज्ञेयः सूषान्या कासमर्द्दिकेति केयदेवः॥ कसोदीति लोके॥ कंपिल्लो रक्तचूर्णः॥ पिप्पलश्शल्लदर
लः॥ दुस्पर्शेति॰ स्वयंगुप्ताकपिकच्छूः॥ कंटालीकंटकारिका॥ यवासको यासः॥ पलाशइति॰

पांशुरजसि सस्यार्थेचिरसंचितगोमये शान्त्रि॰ कपिशात्वतिमुक्तेपिकपिशः क्रिमिपिण्डिते
कर्कशस्त्विक्षुभित्काशमर्द्दकाम्पिल्लपिप्पले॥ दुस्पर्शानुस्वयंगुप्ताकण्टार्योर्नायवासके॥ पला
शः किंशुके शट्यां भूकेशः शीवलेवटे॥ लोमशानुजरामांसीकाकजंघावलाभिदि॥ आत्म
गुप्ताहैमवतीमहामेदामलीमसे शान्त्राः अक्षंसो वर्च्चलेनुत्थेनारुद्राक्षेविभीतके रुक्ष
स्तुभल्लुकेदीर्घवृन्तेचक्रतवेधने कास्त्रीनुवरिकाग्रन्थ्यो॥ ॥ किंशुको ब्रह्मवृक्षः॥ शटीक
र्चूरः॥ भूकेशइति॰ शीवलः शैवालः॥ वटः वकुपात्॥ लोमशेति॰ जरामांसीभूतजटा॥ काकजंघा
नदीकांता॥ वलाभिदतिवल्ला॥ आत्मगुप्ताकपिकच्छूः॥ हैमवतीवचा॥ महामेदामलीछिद्रा॥ मली
मसंकासीसं॥ शान्त्राः॥ षड्॥ अक्षमिति॰ सोवर्च्चलंस्यानुत्थकमक्षंपाकंचतन्मतमितिनिघंटुः॥
तुत्थममृतासंगं॥ रुद्राक्षः शिवप्रियः॥ विभीतकः कर्षफलः॥ रुक्षइति॰ भल्लुकेश्योनाकेरुक्षइतित्रि॥ ॥

शिवप्र॰ ९७

घोषइति॰ कोषातकीमित्र॥धामार्गवोघोषकः स्यादित्यमरः॥मिसिः शतपुष्पा॥घोषामधुरिकामिसिः॥
कर्कोटी॰ कर्कोटीचकर्कटं वध्रघोषालोमसपत्रिकेतिधन्वंतरिः॥तुषइति॰ धान्यत्वकूस्पष्टं॥अक्षः कर्षफ
लः॥धान्यत्वचितुषः पुंसिविभीतकतरावपीतिमूर्द्धन्यांतरुद्रः॥प्लक्षइति॰ पर्कटीजटी॥प्लक्षोजटीप
र्कटीस्यादित्यमरः॥विज्ञेयापर्कटीप्लक्षः प्लक्षः पिप्पलपादपइतिशाश्वतः॥पाकरिरितिलोके॥गा

घोषः कोषातकीमिदि घोषामिस्यांचकर्कोट्यांतुषोधान्यत्वगक्षयोः प्लक्षस्तुपर्कटीगर्द्दभा
ण्डयोः कुञ्जराशने विषंजलेऽक्ष्वियांक्ष्वेडस्त्रियांमाद्र्यांरषः श्रियाम अश्वासिंह्यांर्हवाम्हऊंी
लताद्युद्धाजयास्तुच॥ ॥

ईभांडः कुंजराशनः पिप्पलः॥विषमिति॰ जलंपानीयंक्ष्वेडोमृते॥माद्री अतिविषा॥रवइति॰ श्रीः सरल
द्रवः पीपिष्टोदधिक्षीरघृताद्युपइतिरभसः॥श्रीर्लक्ष्मीर्भारतीशोभाप्रभासुसरलद्रवइतिलोचनः॥ ९७
रूषः स्याद्दासकेधर्मेसौरभेयेचशुक्रलेइतिरभसः॥अश्वा अश्वगंधा॥सिंहीवासकः॥शृंगीकर्कटशृं गी॥लताज्योतिष्मतीपुत्राकपिकच्छुः॥जयाद्रवन्ती॥

षत्रि॥कुल्माषमिति॰कांजिकमवंतिसोमं॥अर्द्धस्विन्नधान्यं यवादि॥यवोहरिप्रियः।चलोहरिमंथः॥पेयूष
मिति॰पीयूषं च।पेयूषोभिनवंपयइतिहेमचंद्रः॥आसप्ताहान्नुयेयूषंततोमोरणइतिवैजयंती॥अमृतंसुधा
॥पीयूषममृतंसुधेत्यमरः॥शिरीषइति॰मृदुपुष्पो भंडीरः॥शिरीषोमृदुपुष्पश्च भंडीरः शंखिनीफलइतिध
न्वंतरिः॥कृष्णपाकफलः करमर्द्दः॥मकरंदः करमर्द्दः शिरीषोमृदुपुष्पकइतिशुभांकः॥षच॥अलंबुषइति॰छ
र्द्दनो निंबः॥मुंडीरंमुंडीरवरत्वक् अलंबुषारवरत्वक्कतथामेदोगलामतेति॥लज्जालुभेदइतिभावमिश्रः॥

षत्रि कुल्माषंकांजिकेनार्द्धस्विन्नधान्येयवेचणे पेयूषमपिपीयूषंनवेक्षीरेपिचामृते शिरीषोमृदु
पुष्पेचकृष्णपाकफलेपिच षच अलम्बुषश्छर्द्दनेस्त्रीमुण्डीर्यां चरवरत्वचि ऋषभाक्षीन्द्रवारुण्यां
मृषभाक्षस्तुमुस्तके कालमेषीसमङ्गायां वाकुच्यांत्रिवृताभिदि देववृक्षःपुरेपर्णेमन्दारादौस्नु
चौद्रुमे नन्दीवृक्षस्तुकाश्मर्यां कुवेरेच प्ररोहिणि॥

ऋषभाक्षीति॰इंद्रवारुणीरंद्राक्षी॥मु
स्तकंमुस्ता॥कालमेषीति॰समङ्गामंजिष्ठा॥वाकुची॰कालमेषी कृष्णफला वाकुचीपूतिफल्यपीत्यमरः
॥त्रिवृताभित्कालां॥देववृक्षइति॰पुरोगुग्गुलः॥पर्णःसप्तपर्णः॥मंदारादिः॥पंचैतेदेवतरवो
मंदारःपारिजातकः॥संतानःकल्पवृक्षश्चपुंसिवाहरिचंदनमित्यमरः॥स्नुचौद्रुमोवृक्षकंटका
रिका॥नन्दीवृक्षइति॰काश्मरीगंभारी॥कुवेरस्तुणिः॥प्ररोहीनन्दीवृक्षोश्वत्थभेदः प्ररोहीगजपा
दपइतिभावमिश्रः॥अश्वत्थभेदोधोमुख॥पत्रशाखः॥चेल्लियापीपलइतिलोके॥ ॥

पलङ्कषेति० रसा रास्ना॥ मुंडी मुंडीरी॥ लाक्षा जतु॥ पुरो गुग्गुलुः॥ क्षुरो गोक्षुरः॥ किंशुकः पलाशः॥ वीरवृक्ष
इति० भल्लातकोरुष्करः॥ अर्जुनः ककुभः॥ ककुभ शब्दवाच्यः॥ भूतवृक्ष इति० शाखोटः पीतफलको भूतावा
सः खरच्छद इति भावमिश्रः॥ सहोरुणादितिश्लोके ख्यातः॥ श्योनाको रलुः॥ विभीतकोऽक्षः॥ राजवृक्ष इति०॥
शंपाक आरग्वधः॥ पियालो मुनिप्रियः॥ क्षत्रियो राजादनं॥ प्लवो गर्दभांडः॥ पान्ना॥ सद्धि॥ वसुरिति० वृद्धि
योग्यं॥ शोधनी श्रावली वसुः॥ योग्यमिति वैद्यदेवः॥ बुकः शिवमल्ली॥ मांसीति० कंकोली वाढपत्रा वह्री॥

पलङ्कषा रसा मुंडी लाक्षा स्वथ पुरे क्षुरे किंशुके च पुमान्वीरवृक्षो भल्लातके र्जुने भूतवृक्षस्तु शाखो
टश्योनाके च विभीतके राजवृक्षस्तु शम्पाके पियाले क्षत्रिये प्लवे पान्ना: सद्धि वसुर्वृद्धौ बुकमां
सी कङ्कोलीजटयोः स्त्रियाम् मिसिः स्त्री मधुरा मांस्योः शतपुष्पाजमोदयोः मसा नाक्षी श्रे
ष्ठमहोरसः सूते विषे चले स्त्री रास्नाशल्लकी पाठा द्राक्षा मूर्वा मुदीषु च॥ ((यस्याः फलानि कंकोला

नि॥ जटा जरा मांसी॥ मिसिरिति० मधुरा मेथिका॥ मांसी जरा मांसी॥ शतपुष्पा शताह्वा॥ अजमोदा यवा
नी भेदः॥ वह्निर्मार्जनी॥ स्यान्मास्यां शतपुष्पायां मधुरायां मिसिः॥ स्त्री मधुरा मांस्योः शतपुष्पाजमोदयो
रिति मेदिनी सोमनंदी तु मिशी मिशिरिति तालव्यांते आह॥ मसेति० द्राक्षा तुवरी॥ श्रेष्ठमुत्तमरसा॥ रसइ
ति० सूतं पारदः॥ विषं काकोलः॥ वलं बोलः॥ रास्ना सुरभिः॥ शल्लकी गजभक्ष्या॥ पाठा वष्टा॥ विद्धक
र्णी स्थापनी श्रेयसी रसेत्यमरः॥ द्राक्षा मृद्वीका॥ मूर्वा मधुरसा देवी रसा मधुस्रवतयेति हृदयदीप

सन्ति॥ कुलसीति॰ पृक्षिपर्णी गुहा॥ दाडिमीकरकः॥ लेख्यपत्रो भूर्जः॥ पयइति॰ क्षीरं दुग्धं॥ नीरमुदकं॥ रजइति॰ रेणुः पर्यटः॥ परागः सुमनोरजः॥ रजो नापि रजः सममिति द्विरूपेषु विश्वः॥ वायसइति॰ वृकधूपः श्रीवासः॥ अगुरुद्रुमः जोंगकं॥ काकोदुंबरि कामलघ्नः॥ काकमाची ध्वांक्षमाची॥ श्रीवास सरलाह्वः श्रीवेष्टो वृकधूपकइति॥ पंकजं कमलं॥ अथ श्रेयसीति॰ रास्नारसा॥ रास्नायुक्तारसा रस्या श्रेयसी रसना रसेति निघंटुः॥ करिपिप्पली॥ गजपिप्पली॥ अभया हरीतकी॥ वचा हैमवती॥ सुरसइ

सन्ति॥ कुलसी पृक्षिपर्ण्यो स्याद्दाडिमी लेख्यपत्रयोः पयः क्षीरे च नीरे च रजो रेणुपरागयोः वायसो वृकधूपे च पुंसि स्यादगुरुद्रुमे काकोदुम्बरिकायां तु काकमाच्यां च वायसी श्रीवासः सरलाह्वे पङ्कजे चापि श्रेयसी॥ रास्नायां करिपिप्पल्यामभयावचयोरपि सुरसस्तु द्वयोरर्जे तुलसी रास्नयोः स्त्रियाम् स च अथो घनरसः पीलुपर्ण्यां च क्षीरमोरटे॥ हिमोपले मेघपुष्पे दक्षिणावर्तपारदे॥

ति॰ अर्जः पर्णासः॥ सुरसं तु त्रिषु स्वादौ पर्णासे न नपुंसकमिति॰ तुलसी कृष्णा॥ रास्ना सुरभिः॥ स च॥ अथो घनरसइति॰ पीलुपर्णी मूर्वा॥ मूर्वा मधुरसा देवी पीलुपर्णी मधुस्रवेति धर्म्मिष्ठः॥ क्षीरमोरटो मूर्वाभेदः॥ घनमूलोपरः क्षीरमोरटो मोरटपुष्पकइति केयदेवः॥ हिमोपलः करकः॥ शीताम्भः शीतलं रजो घनसारो हिमोपलइति केयदेवः॥ मेघपुष्पं आपः॥ आपस्तोयं घनरसपयः पुष्करं मेघपुष्पकं पानीयं सलिलममृतं वारि वाः शंवरं चेति हलायुधः॥ दक्षिणावर्त्त पारदः सिद्धरसः॥ भवेद्घनरसः सांद्रे निर्यासे मोर

शिवप्र०
९९
99

दीर्घायुरिति० ताम्रपुष्पा शाल्मली॥ चिरजीवकः जीवदः॥ मधुरसेति० गुडा द्राक्षा॥ मूर्वा देवी॥ गं
भारीक ट्फला॥ क्षीरिणी दुग्धिका॥ महारसइति० दीर्घपत्र इक्षुः॥ खर्जूरोदुरारोहः॥ केसरु
वृषपर्णी॥ सूतः पारदः॥ मालीमसमिति० पुष्पकासीसं भूमिजो धातुः॥ सर्वतैजसं लोहं॥ लोहस्तु
शस्त्रे लोहं तु जोंगके सर्वतैजसे इति लोचनः॥ सुमनाइति० करजः पूतीकरंजः सुमनास्त
था वात्महनाशनइतीदुः॥ जाती मालती॥ गायत्री रिमरोधपुंड्र सुमनोजं वृसमंगा वृष

दीर्घायुस्ताम्रपुष्पायां पुंसि स्याच्चिरजीवके मधुरसा गुडामूर्वागम्भारीक्षीरिणीषु च महा
रसो दीर्घपत्रे खर्जूरेपि च केसरुणि सूते मलीमसं पुष्पकासीसे सर्वतैजसे सुमनाना करञ्जे
९९ स्त्री जात्यां भूम्नि स्त्रियां सुमे सन्नाः
श्रेष्ठायपंक्ति पच्चं पचान्यतममलमिइतिवोपदेवः॥ टावंतोपि॥
सुमनायाश्च पत्रेण पटोलारिष्टयोस्तथेति सुश्रुतवचनात्॥ सुमना मालती जाती जातिरिस्यम
रश्च॥ विकसितसुमनासुमेषुसत्सु प्रवालमरंदभरेण तुंदिलेषु॥ मधुकर करमर्दकद्रुमाणां कि
मिति मुधा कुसुमेषु च भ्रमीषि तिगोस्वामिगोपेश्वराणाम्॥ सुमं कुसुमं म॥ भूम्नि स्त्रियां सुमनस ९९
इति रत्नकोषः॥ सुमनाः पुष्पमालत्योः स्त्रियां नाधीरदेवयोरिति सांतमेदिन्यादिदर्शनादेकत्वमपि॥ पु
ष्पं सुमनाः कुसुममिति नाममालादिदर्शनाच्च॥ सुमनाः प्राज्ञदेवयोः॥ जात्यां पुष्पइतिहेमः सांतवर्गे॥
सान्ताः॥ ॥

ह्ट्टि॥ व्रीहिरिति॰सामान्यधान्यंधान्यमात्रं॥आशुव्रीहिः पाटलः॥पाटलः पाटलापुष्पाभोव्रीहिरितिसि
द्धमंत्रप्रकाशः॥रुहेति॰रोहिणीकटुरोहिणी॥दूर्वाहरिता॥लोहमिति॰जोंगकं अगुरुप्रवरंलोहंराजार्हं
जोंगकंत्वधिितिभावमिश्रः लोहस्तु शस्त्रं लोहंतु जोंगकेसर्वतैजसइतिलोचनः॥सर्वतैजसंसुवर्णरज
तंताम्रंरीतिः कांस्यंतथात्रपु॥सीसकालायसंचैवमष्टौलोहानिचक्षतइति॥सहेति॰सहदेवावला

ह्ट्टि व्रीहिः सामान्यधान्येस्यात्स्यादाशुव्रीहौपुमान् रुहा रोहिणीदूर्वयोर्लोहं जोंगे ऽ कुः केसर्वतैजसे
सहातुसहदेवायांमुद्गपर्ण्यांनखेपिच कुमार्य्यांवनकर्पास्यांशतपत्र्यांवलाभिदि सिंहोवकु
लेसिंहीवृहतीद्वयत्वृषककाकलीवड्डे ॥

((भेदः॥पीतपुष्पाकंकतिका॥मुद्गपर्णीयथार्थैवशर
पुंखाभगुल्मकइति॥नखोव्याघ्रनखः॥कुमारीघृतकुमारी॥वनकर्पासीचंदनवीजिका॥वनक
र्पासिकायांतुसहाचंदनवीजिकेतिभावमिश्रः॥शतपत्रीकुंकुमभेदः॥वलाभिदितिवला॥सिंह
इति॰वकुलोमधुदोहदः॥सिंहस्तुवकुलःसमावितिसिंहः॥वृहतीद्वयंकंटकारीद्वयी॥वृषकोवास
कः॥काकलीकपर्दकजातिः॥वड्डं वार्त्ताकम्॥ ॥

हस्त्रि॥ किरिहीति॰ अश्वखुरः कटभी॥ मार्ग्गआघाटः खरमंजरीति समानार्थाः॥ वराहइति॰ किटिर्वा
राहीकंदः॥ मुस्ताद्रः॥ वैदेहीति॰ रोचना गोरोचना॥ शौंडी पिप्पली॥ सुवहेति॰ शल्लकी गजभक्ष्या च सु
वहा सुरसा रसेति भावमिश्रः॥ रास्ना रसा॥ शेफाली नीलपुष्पी च निर्गुंडी शेफाली सुवहा च सेति भा

हस्त्रि किरि ह्यश्वखुरे मार्ग्गे वराहः करि मुस्तयोः वैदेही रोचना शौण्ड्योः सुवहा शल्लकी नुमे रा
स्ना शेफालिका गोधापद्येला पर्णिका सु च हच महासहा माषपर्ण्यम्लाने वक्रकण्टके हा
न्ताः॥

वमिश्रः॥ सभाल्लूइतिख्यातः॥ गोधापदी तु सुवहा त्रिपदी हंसपद्यपीति कोषान्तरम्॥ एलापर्णी
तु सुवहा रास्ना युक्तरसा च सेति॥ हच॥ महासहेति॰ माषपर्णी कांबोजिका॥ माषपर्णी तु कांबोजी कृ १००
ष्णवृन्ता महासहेति धन्वन्तरिः॥ अम्लानः कुमारिकाभेदः॥ अम्लानस्तु महासहेत्यमरः॥ वक्र
कण्टकः कुब्जकः॥ हान्ताः॥ ॥

ग्रन्थार्थमुपसंहरति॥प्रचुरेत्यादि०विज्ञाज्ञाताः॥प्रायः बाहुल्येन॥अशेषाभिधानेनेन्द्रादीनामपि
शक्तुमशक्यत्वात्॥उत्पलिनीकोषविशेषः॥तत्प्रभृतिषु तदादिषु॥तेनाभिधानचूडामण्यादीनामपि
ग्रहः॥ग्रन्थकृदात्मानं ख्यापयति॥नवग्रहेति०हायनोस्त्रीशरत्समाइत्यमरः॥हालःशालवाहनपार्थि
वः॥हालासुरायामिति हैमः॥चातुर्भुजिः॥अलङ्कृ॥पूर्वापुराम्नाय कृतां वचोभिः शिवप्रकाशोरचि

प्रचुरप्रयेण विज्ञाये शब्दास्तइहकीर्तिताः प्रायः॥दृष्टाअप्युत्पलिनीप्रभृतिषु चान्येपरिको
क्ताः॥१॥नवग्रहतिथिप्राप्तेहायने हालभूभुजः॥चक्रे चातुर्भुजिः कोषं शिवदत्तः शिवा
भिधम्॥२॥ ॥इति कर्पूरीयचतुर्भुजात्मजशिवदत्तः कृतः शिवकोषः संपूर्णः॥ ॥

तोयतोस्मिन्॥विधीयतां दोषविधौ समाधिर्ग्रन्थेन दोषः कुनरप्रणीते॥सततपरहितैकमानसा १०१
नां विमलधियां गुणिनाममत्सराणाम्॥विलसतु हृदये चिकित्सकानामिति शिवदत्तकृतः शिवप्र
काशः॥ ॥इति कर्पूरीयचतुर्भुजात्मजशिवदत्तकृतः शिवप्रकाशः संपूर्णः॥ ॥संवत् १९८०
चैत्रकृष्ण २ भौमवासरे॥ ॥

शिवद्दताकं त शिवकोश